रुक्तं तदसङ्गतम्। विशिष्टाप्रसिद्धौ विशिष्टार्थबोधकतया सव-यादिसम्मतानां पदवाक्यस्वरूपाणां शास्त्राणां वैयर्थ्यापत्त्या तेन च शास्त्रेण प्रवर्तमानानां स्वच्छन्दप्रवृत्तित्वापत्त्या त्रैवर्णिकत्वादि-विशिष्टाधिकारिणामभावेन सर्ववर्णाश्रमधर्माणां विप्लवः स्यात्। अस्मदुक्तवाक्येन भवतां विशिष्टशाब्दबोधस्यैवाऽनुदयेन भवताम-त्तरप्रवृत्तेरसम्भवात्। भवतां ज्ञानविशिष्टत्वाभावेन भवदुत्तरा-णामनुत्तरणीयत्वापत्तेश्च भवद्भिर्रनिच्छद्भिरपि विशिष्टस्वीकारः कर्तव्य इति विशिष्टाभेदखण्डनमाशामोदकायितम्। "मृत्योः स मृत्युमाप्नोति" इत्यादिः श्रुतिरपि "न ज्ञाज्ञौ द्वावजावीश-नीशौ द्वा सुपर्णा सयुजा सखाया नित्यो नित्यानां चेतनश्चेत-नानां सर्व एवात्मानः समर्पिताः गुहां प्रविष्टावात्मानौ हि तद्द-र्शनात्" इत्यादिप्रमाणशतप्रतिपन्नं नानात्वं प्रतिषेधति, किन्तु यच्च त्वस्य "सर्वमात्मैवाभूत् ऐतदात्म्यमिदं सर्वम्" इत्यादिना सर्वस्येदं शब्दनिर्दिष्टस्य प्रत्यक्षादिप्रमाणप्रतिपन्नस्य ब्रह्मात्मकत्व-प्रतिपादनात् तद्विरुद्धमब्रह्मात्मकनानात्वं यथा सार्वभौमो राजैक एव न नानेत्युक्तौ सार्वभौमान्तरमेव प्रतिषिध्यते, न तु कोशभूमिपरिजनादिनानात्वं तथेति न तावता स्वरूपाभेद-सिद्धिरतो न तत्र तात्पर्य्यावगमसम्भवो वेदान्तवाक्यानामित्य-लमिति।

प्रश्न० किं च पूर्वाचार्य्यैर्भारतभागवतादिटीकाकारैर्यथा विरोधपरिहारः कृतः सप्रमाणमप्रमाणं वेति।

दुर्ज० इति तृतीयं वाक्यं तत्रेदमुत्तरम्। भारतभाग-

वतादिटीकाकारा नीलकण्ठश्रीधरादयो न हि सर्वमतानुगुणेन टीकामकुर्वन्, किन्तु स्वस्वाभिमतसम्प्रदायानुरोधेन कण्ठतो भेदप्रतिपादकानामपि वाक्यानां कथञ्चिदभेदप्रतिपादकत्वमापाद्य टीकामकुर्वन्। तथाऽस्मत्सम्प्रदायाचार्य्यैर्व्यासार्य्य-वीरराघवाचार्य्यप्रभृतिभिरस्मत्सम्प्रदायाऽनुरोधेन टीकाः कृताः। तादृश-टीकाः परित्यज्यान्यसम्प्रदायस्थैः कथञ्चित् स्वसम्प्रदायानुरोधेन स्वाभिमतप्रतितन्त्रार्थे वाक्यानि ि योजयद्भिरङ्गीकृताः टीका अस्मत्सम्प्रदायविरुद्धा अस्माकमनुपादेयाः। तत्कृतो विरोधपरिहारश्च नास्माकमभिमतः अस्मत्सम्प्रदायाचार्य्यैरन्यथैव विरोधस्य परिहृतत्वात् अन्यथैकसम्प्रदायस्थपुरुषकृतटीकायाः सर्वसम्प्रदाय्युपजीव्यत्वे श्रीरामानुजशङ्करमध्वभास्करनीलकण्ठादिभाष्याणां विलयप्रसङ्गः सम्प्रदायभेदश्च न स्यात्। एवं शङ्करभाष्योपरि प्रवृत्तभामतिनिबन्धनकल्पतरुपरिमलपञ्चपादिकाविवरणतत्वप्रदीपाख्यानां व्याख्यानामवच्छेदक-प्रतिबिम्बवादावलम्बिनीनां सर्वोपजीव्यं भाष्यं स्वस्वानुगुण्येन योजयन्तीनां कथं कस्याप्युपादेयता स्यात्। अतस्त्वदुक्तपूर्वाचार्य्यकृतव्याख्यास्तत्र प्रतिपादितविरोधपरिहारश्च क्वचित् क्वचिदप्रमाणमेवास्माकम्। यत्रास्मत्प्रतितन्त्रविरोधोऽस्तीति।

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, यदपि किं च पूर्वाचार्य्यैर्भारतभागवतादिटीकाकारैर्यथा विरोधपरिहारः कृतः सप्रमाणमप्रमाणं वेत्यत्रप्रश्नोत्तरेऽङ्कितैर्नीलकण्ठ-श्रीधरादिषु

भेदप्रतिपादकश्रुतीनां हठादभेदकप्रतिपादकत्ववर्णनेनैकदेशित्व-बोधनपूर्वकं भेदस्य पारमार्थिकत्वाऽभिप्रायकं स्वाचार्य्यरामानुजादिकृतटीकाविरुद्धेतराचार्य्य कृतटीकांशस्याप्रामाण्याभिप्रायकं च तत्रोत्तरमित्यारभ्यास्तीत्यन्तकमुक्तं तदपि तुच्छम् । भेदे प्रमाणाभावेन तत्प्रतिपादकश्रुतेर्हठादभेदप्रतिपादकत्ववर्णनेनैत्यस्य वक्तुमशक्यत्वात् । ननु कथं भेदप्रमाणाभावः इदमस्माद्भिन्नमिति प्रत्यक्षप्रमाणस्य सुरभिधूमात्मकलिङ्गविशेषाद् वह्नौ चन्दनीयत्वप्रत्यायकत्वादनुमानप्रमाणस्य श्रुत्यादीनां बलाबल-बोधकश्रुतिलिङ्गवाक्यप्रकरणेत्याद्यागमप्रमाणस्य अनेन सदृशी मदीया गौरित्युपमानप्रमाणस्य तिलेभ्य एव तैलं पयस एव दधीति अर्थापत्तिप्रमाणस्य सत्त्वादिति चेन्न तादृशप्रत्यक्षेण भेद एव विषयीक्रियत उत वस्त्वपि ? यदि वस्त्वपि तदा भेदग्रहपूर्वकं तद्विषयीक्रियते, उत तद्ग्रहपूर्वको भेदो युगपदेव वोभयं ? नाद्यो धर्मिप्रतियोगिप्रतिपत्तिमन्तरेण भेदस्य प्रत्येतुमशक्यत्वात् । न द्वितीयो बुद्धेर्विरम्यव्यापाराभावात् । न तृतीयः कार्य्यकारण-बुद्ध्योर्यौगपद्याभावात् धर्मिप्रतियोगि-प्रतिपत्तेर्भेद-प्रतिपत्ति-कारणत्वात् । न च भेदस्य वस्तुस्वरूपत्वे वस्तुग्रहस्यैव भेदग्रहत्वान्निरुक्तविकल्पानवसरतया न दोष इति वाच्यम्, तथा सति भेदग्रहस्य प्रतियोग्यनपेक्षत्वप्रसङ्गात् प्रतियोगिसापेक्षत्वेन भेद-ग्रहस्य सर्वैर्भेदवादिभिरङ्गीकृतत्वात् । न च भेदमात्रस्य वस्तु-स्वरूपत्वं, किन्तु सप्रतियोगिकस्य तथा च नोक्तदोष इति वाच्यम्, तथा सति भेदद्वारा प्रतियोगिनोऽपि धर्मस्वरूपत्वेऽद्वैत-

प्रसङ्गात् । किंच भेदस्य वस्तुस्वरूपत्वे संशयाभावप्रसङ्गः धर्मिदर्शनमात्रेण तद्रूपभेदस्य दृष्टत्वात् । एवं धर्मभेदोऽपि निराकरणीयोऽनयैव रीत्या अनुमानादीनामपि भेदग्राहकत्वं निराकरणीयं ग्रन्थबाहुल्यभयान्नात्र तत्प्रकारो नोल्लिखितः । यदप्युक्तं तथास्मत्सम्प्रदायाचार्य्यव्यासार्य्यवीरराघवाचार्य्यप्रभृतिभिरस्मत्सम्प्रदायानुरोधेन टीकाः कृताः । तादृशटीकाः परित्यज्यान्यसम्प्रदायस्थैः कथञ्चित् स्वसम्प्रदायानुरोधेन स्वाभिमतप्रतिपन्नार्थे वाक्यानि योजयद्भिः कृताः टीका अस्मत्सम्प्रदायविरुद्धा अस्माकमनुपादेया इति तत्रोच्यते । यद्युपक्रमोपसंहारबलेन वेदान्ततात्पर्य्यमवगम्य भवदाचार्य्यैः कृताः टीकास्तदाऽस्मत्सम्प्रदायकृतटीकायाः स्वसम्प्रदायविरुद्धांशाक्रान्तत्वेनाऽनुपादेयत्वं भवदुक्तं समीचीनं भवेत्, तदेव तु न भवदाचार्य्याणां श्रुतिस्मृतिविरुद्धैकजात्युचितधर्मं सर्वत्र लोभादिना प्रवर्तयता भवदाचारेण निरुक्तप्रकारेण वेदान्ततात्पर्य्यानभिज्ञत्वस्य स्पष्टतया प्रतीयमानत्वात् । यदप्युक्तमन्यथेत्यारभ्य विलयप्रसङ्ग इत्यन्तकं तदिष्टापत्तिग्रस्तम् । तेषामधर्मप्रतिपादकानां विलयार्थमेव महाराजाधिराजप्रवृत्तेः । यदप्युक्तं सम्प्रदायभेदश्च न स्यादिति तदप्यसङ्गतम् । वेदरूपसम्प्रदायभेदस्य तत्तच्छाखाभेदेन भगवता व्यासेनैव कृतत्वात् तदितरसम्प्रदायस्य चाभावात् । यदप्युक्तमेवं शङ्करभाष्येत्यारभ्योपादेयता स्यादित्यन्तकमिति तदपि तुच्छम् । निरुक्तक्रमेण वेदान्ततात्पर्य्यमवगत्य भगवच्छङ्कराचार्य्यकृतभाष्यानुकूलत्वेन तेषामनुपादेय-

तस्य वक्तुमशक्यत्वात्। तस्मात् नीलकण्ठादिकृतभारतादिकृत-टीकायाः सर्वांशे प्रामाण्यमङ्गीकार्य्यं त्याज्यं च रामानुजादिप्रतिपादितशूद्राचार्य्यप्रवर्तिताचरणमित्यलमिति तत्व-खण्डनमिति।

व्या० अत्र यदपीत्यादिनाऽस्तीत्यन्तकमुक्तमित्यन्तेन स्वप्रश्ना-द्युत्तरे अनूद्य तदपि तुच्छमिति प्रतिज्ञाय भेदेत्यादिना वक्त-व्यावक्तव्यपरिज्ञानप्रतीपैर्दुर्वाक्यैकसारैर्वाक्याभासा उक्तास्ते सर्वे स्वत एव निरस्ता अपि निरस्तत्वं बोधयितुमस्माभिः किञ्चि-दुच्यते, भेदे प्रमाणाभावेनेत्यादिनाऽशक्यत्वादित्यन्तेन यदुक्तं तत्तु-च्छम्। भेदे प्रमाणाभावेनेत्यनेन किमपरमार्थभेदे प्रमाणा-भावो भवदभिमत उत पारमार्थिके? तत्र नाद्यः। अद्वैतवादि-भिरपि व्यवहारदशायां तदङ्गीकारस्य भवद्भिरेवोक्तत्वात् अन्य-थोद्रिक्तसत्वादिमत्तया विष्णुशिवादिभेदप्रतिपादनस्यासाङ्गत्या-पत्तेः। तत्र प्रमाणाभावे त्यज्यतां स भेदः व्यवहारकाले व्यव-हारोपपादनार्थं कस्यचिद्भेदस्यावश्यकतया परिशेषात् पार-मार्थिक एव भेदोऽङ्गीकर्तव्यः। नन्वपरमार्थिको भेदोऽङ्गीकृत एव पारमार्थिक एव प्रमाणाभाव उच्यते इति चेन्न नन्वि-त्यादिभेदखण्डनासङ्गतिः अपरमार्थिकभेदेऽपि त्वदुक्तधर्मि-प्रतियोगिज्ञानसापेक्षज्ञानत्वस्यावश्यकतया तत्रापि प्रमाणाभाव-स्यावश्यकत्वात्। अतएव न द्वितीयः। किं च पारमार्थिकभेदे प्रमाणाभावं प्रतिजानता स भेदः कथमुपलब्धः? यदि केन-चित् प्रमाणेनेत्युच्यते? तर्हि बाधः। अप्रमाणेनेति चेत्। नत्व-

प्रमाणेन अत्यन्तासत उपलब्धिः सम्भवति, क्वचित् सत एव पीतशङ्खादेरजतत्वादेश्च दुष्टेन प्रमाणेनान्यथोपलम्भदर्शनात्। ननु भेदे प्रमाणाभावो नास्मदभिप्रेतः, किन्तु भेदज्ञानजनकं यत् तत्र प्रमाणमिति विवक्षितमिति चेन्न प्रमाणेनाप्रमाणेन वास्तु भेदप्रतीतिस्तथापि न वक्ष्यमाणरीत्या प्रमाणानुपपत्तिसम्भवः। अतो भेदप्रमाणस्य वक्ष्यमाणतया भेदप्रतिपादकश्रुतेर्हठादभेदप्रतिपादकत्ववर्णनेत्येतत्तुच्छमेव। नन्वित्यादिकं यदुक्तं तदसङ्गतम्। अयं चन्दनीय-वह्निमान् सुरभिधूमादित्यनुमानेन विधेयतावच्छेदकतया वह्नौ चन्दननीयत्वसिद्धावपि न भेदसिद्धिरिति तदात्मकलिङ्गविशेषज्ञानात्मकानुमानस्य भेदप्रमाणत्वोपन्यासोऽज्ञानमूलक एव। किं च श्रुत्यादीनां बलाबलबोधकस्य श्रुतिलिङ्गवाक्यप्रकरणेत्यादेरागमत्वं भेदे प्रमाणत्वं च भवन्तं विना को वा ब्रूयात् स्वोक्तिमप्यागमं मन्यमानो भवान् तस्यागमत्वं कुतो न ब्रूयात्। किं चानेन सदृशी मदीया गौरिति सादृश्यज्ञानात्मकोपमानेन पुरोवर्त्तिन्ययं गोपदवाच्य इति शक्तिपरिच्छेदसम्भवेऽपि न तेन भेदपरिच्छेदः। उपमानप्रमाणस्य संज्ञासंज्ञिसम्बन्धपरिच्छेदकत्वस्यैव तान्त्रिकसम्मतत्वात्। क्वचिद्गोकुलनाथोपाध्यायादिभिराकाङ्क्षापरिच्छेदकत्वाङ्गीकारेऽपि न भेदकसाधकत्वसम्भवः। यत्तु तादृशप्रत्यक्षेणेत्यादिना विकल्पपूर्वकं किञ्चिदुक्तं तदसमीचीनम्। प्रथमं चक्षुरादिना धर्मिणः प्रतियोगिनश्च प्रत्यक्षं तदनन्तरं चायमस्माद्भिन्न इति भेदप्रत्यक्षमिति भेदप्रत्यक्षोपपादनसम्भवे

भवदुक्तदूषणानामनवकाशात्। यद्वा धर्मिप्रत्यक्षं तदानीमनुद्बुद्धसंस्कारान्यप्रतियोगिविषयकस्य सत्त्वेनानन्तरक्षणे भेदप्रत्यक्षं प्राचीनैर्विशिष्टबुद्धौ विशिष्टवैशिष्ट्यबुद्धौ वाऽनुद्बुद्धसंस्कारान्यविशेषणविषयकस्य विशेषणतावच्छेदकप्रकारस्य वा सविषयकस्य कारणत्वाङ्गीकारेण तुल्यन्यायेन प्रकृतेऽपि प्रतियोगिसंस्कारादपि भेदबुद्धिसम्भवात्। नाद्य इति न सत्। धर्मिप्रतियोगिप्रतिपत्तेः पूर्वकालीनायाः भेदप्रत्यक्षकारणस्योक्तत्वात् भेदमात्रविषयीकरणेऽनुपपत्त्यभावात्। वस्तुतः लौकिकालौकिकप्रत्यासत्त्याप्रत्यासन्नाः प्रतियोगिधर्मिभेदाः भेदप्रत्यक्षेण विषयीक्रियन्त इति तत्त्वम्। न द्वितीय इत्यपि न एकस्या बुद्धेः कालभेदेन तदवगाहने विरम्यव्यापारप्रसक्तेः। न तृतीय इत्यपि न कार्य्यकारणयोः पौर्वापर्य्यस्योक्तत्वात्। किं च तादृशेत्यादिना प्रथमं द्विधा विकल्पः कृतः, द्वितीयं शिरः पुनस्त्रिधा विकल्पितम्। एवं च चत्वारो विकल्पाः कृताः कल्पत्रये दूषणमुक्तम्। अतो विकल्पसङ्ख्यामपि न जानन्ति भवन्तः। यत्तु न चेत्यादिशङ्कायास्तथा सतीत्यादिसमाधानमुक्तं तदज्ञानकृतम्। भेदस्य वस्तुस्वरूपत्वाङ्गीकारे भेदग्रहस्य प्रतियोग्यनपेक्षत्वं कथं प्रसक्तम्। यद्यपि भेदग्रहस्य प्रतियोग्यपेक्षत्वं न केनाप्यङ्गीकृतम्, तथापि प्रतियोगिपदं प्रतियोगिग्रहपरम्। दूषणाभिधानाभिनिवेशेन तथोक्तमिति ध्येयम्। एवमेवोत्तरत्रापि भेदस्य वस्तुस्वरूपत्वेऽपि भेदत्वेन तज्ज्ञानस्य प्रतियोगिज्ञानसापेक्षत्वस्यानपगमात्। यथा प्रमेयत्वादिना कार्य्यत्वादिज्ञानानां कारणतादिरूपनिरूपक-

ज्ञानानपेक्षत्वेऽपि तत्वेन तज्ज्ञानस्य तदपेक्षतायाः प्रामाणिकसम्मतत्वात्। यत्तु न च भेदमात्रस्येत्यादिशङ्का तत्समाधानं तदुभयमपि न सत्। भेदमात्रस्य वस्तुस्वरूपत्वं नास्ति, किन्तु सप्रतियोगिकभेदस्येत्यनेन निष्प्रतियोगिकोऽपि भेदोऽस्तीत्यवगम्यते। स च गगनकुसुमायमानः कथं भवद्भिरुपलब्ध इति शङ्कासङ्गतिः। सप्रतियोगिकभेदस्य वस्तुस्वरूपत्वेऽपि प्रतियोगिभेदयोरभेदानङ्गीकारेण भेदद्वारा प्रतियोगिनः कथं धर्मस्वरूपत्वं धर्मिस्वरूपत्वं वा तत्प्रयुक्ताद्वैतप्रसङ्गो वा। किं च भेदमात्रस्याप्रामाणिकत्वं प्रतिज्ञाय सप्रतियोगिकभेदस्याप्रामाणिकत्वव्यवस्थापने निष्प्रतियोगिके भेदे प्रमाणाभावाकथनेन न्यूनता तत्रोक्तदोषाणामतिदेशस्यात्र न सम्भवति, तस्य प्रतियोगिन एवाप्रसिद्ध्या प्रतियोगिज्ञानसापेक्षत्वस्य वक्तुमशक्यत्वात्। किं चेत्यादिकमपि न सत्, स्थाण्वादौ धर्मिणि दृष्टेऽपि स्थाणुतद्भेदकोटिकस्यायं स्थाणुर्न वेत्याकारस्य संशयस्येव धर्मिस्वरूपे भेदे दृष्टेऽपि तद्वृत्त्यसाधारणधर्मपुरस्कारेण ज्ञानस्य प्रतियोगिज्ञानसव्यपेक्षस्याभावेन संशयोपपत्तेः। एवं धर्मभेदोऽपीत्यादिकमपि नरशृङ्गदृष्टान्तेन खरशृङ्गतैक्ष्ण्यसाधनम्। अनयैव रीत्येत्यादिकमपि न सत्। अनुमानादीनां भेदज्ञानैकजीवातुत्वात् ग्रन्थबाहुल्यभयाच्चेति अज्ञानान्निरूपणासामर्थ्यात् मषीपत्रालाभाद्वेति तत्वम्। यदप्युक्तमित्यादिनाऽस्माकमनुपादेया इत्यन्तेनास्मदुक्तमनूद्य तत्रोच्यत इत्यादिना यदुक्तम् तदतिनिस्तीनम्। उपक्रमोपसंहारबलेन वेदान्तवाक्यानां

तात्पर्य्यमवगत्यैवास्मदाचार्य्यैः तत्तात्पर्य्यमजानद्भिरन्यैरुक्ताना-
मुपमर्दैन टीकाः कृताः । अतोऽस्मदुक्तमनुपादेयत्वं समीचीन-
मेव । अतः श्रुतिस्मृत्यैकजीवातुं परमवैदिकोचितं परमधर्मं
परमप्रयोजनैकबुध्या प्रवर्तयतां वेदान्ततात्पर्य्यानभिज्ञत्वाभि-
धानं वेदविरुद्धनीचाचारैकजीवातूनामज्ञत्वमापादयत्यैवेति यद-
प्युक्तमित्यादिना यदुक्तं तत्तुच्छम् । लोकायतमतं प्रवर्तयता
सुरगुरुणेव लोभैकदृष्टिभिर्दंशिताः सद्धर्मेभ्यो भ्रंशिता अत
एव प्रशंसिता महाराजाधिराजाः स्वराष्ट्रे किं किं न कुर्युः,
सर्ववैदिकधर्मध्याननार्थमेव तदवतारात् । यत्तु यदप्युक्तमित्या-
दिना तदितरसम्प्रदायस्य चाभावादित्यन्तेनोक्तं तदपि तुच्छम् ।
भवदुक्तसम्प्रदायवैविध्यस्यास्मदुक्तसम्प्रदायबहुत्वस्य च भवद्भिर्वि-
स्मृतत्वात् । यत्तु यदप्युक्तमेवमित्यादि तदपि मन्दम् । शङ्कर-
भाष्योपरि प्रवृत्तानां व्याख्यानानां परस्परविरोधेनोभयेषामप्यनु-
पादेयत्व आपादिते निरुक्तक्रमेणेत्यादिनोक्तस्य समाधानस्यानु-
चितत्वात् एकस्य भाष्यस्य परस्परविरुद्धार्थप्रतिपादकव्याख्या-
द्वयानुगुण्यासम्भवात् । ननु वेदान्तसूत्रगणात्मकमीमांसानु-
गुण्यं यथाशङ्कर-भास्कर-नीलकण्ठादिकृत-परस्परविरुद्धनाना-
भाष्यानुगुण्यं तथा प्रकृतेऽपि सम्भवतीति चेन्न भवन्महाराजाधि-
राजैस्त्वेकमात्रपरिशेषार्थं प्रयत्नस्य क्रियमाणत्वात् । अत
एकव्याख्यायाः स्वीकारेणान्यव्याख्याया अनुपादाने उक्तदोषः
प्रसज्यत एव नीलकण्ठादिकृतभारतादिव्याख्यायाः सर्वांशे
प्रामाण्यस्वीकारे गुणकृतो वर्णविभागो न जातिकृत इति भाव

इति व्याख्यानान्तरस्यापि प्रामाण्यात् त्यज्यतां मात्यभिमान इति भवतां प्रसङ्गात् इति।

प्रश्न० प्रमाणं चेत् तर्हि भवदीयग्रन्थेषु कुतो विरुद्धतया वर्णनमिति।

दुर्ज० इति चतुर्थं वाक्यम्, तत्रेदमुत्तरम्। प्रमाणासंप्रतिपत्तेरेव प्रमाणासंप्रतिपत्तिमूलकमिदं वाक्यं नोत्तरार्हम्। अस्मदीयसम्प्रदायविरुद्धार्थप्रतिपादक-तट्टीकार्थोपमर्दनार्थवर्णनमस्मदीयग्रन्थेषु युक्तमेवेति।

टी० प्रमाणासंप्रतिपत्तेरिति अप्रमाण्यनिश्चयादित्यर्थः। प्रमाणासंप्रतिपत्तिमूलकं प्रामाण्याभ्युपगममूलकं नोत्तरार्हमिति शङ्काकारणस्यैवाभावेन शङ्काया अनुत्थानादिति भावः।

सज्ज० इति रामानुजीयाः, यत्तु प्रमाणं चेत् तर्हि भवदीयग्रन्थेषु कुतो विरुद्धतया वर्णनमिति अस्मत्प्रश्नोत्तरैरङ्कितैः प्रमाणासंप्रतिपत्तेरेव प्रमाणसंप्रतिपत्तिमूलकमिदं वाक्यं नोत्तरार्हमस्मदीयसम्प्रदायविरुद्धार्थप्रतिपादक-तट्टीकार्थोपमर्दनार्थवर्णनमस्मदीयग्रन्थेषु युक्तमेवेत्युक्तं तत्तुच्छम्। तदीयसम्प्रदायस्य निर्मूलतायाः शास्त्रविरुद्धतायाश्चास्माभिः प्रागसकृत् प्रतिपादिततयाऽप्रामाणिकत्वेन तद्विरुद्धाशिष्टपरिगृहीतश्रुतिस्मृत्यनुकूलनीलकण्ठश्रीधरादिकृतटीकासु तदनुरोधेन प्रामाण्यासंप्रतिपत्तेर्वक्तुमशक्यत्वात्। यदि श्रुतिस्मृती परित्यज्य स्वगोष्ठीरङ्कितमात्रेण रामानुजादिकृतटीकाविरुद्धार्थप्रतिपादकनीलकण्ठादिकृतटीकास्वप्रामाण्यमुद्भाव्यते, तर्ह्युद्भाव्यतां का नो हानिः श्रुति-

स्मृती अवलम्ब्यास्मद्धर्मनिर्णये प्रवृत्तेरित्ययुक्तमिति तत्खण्डन-
मिति।

व्या॰ अस्मदीयसम्प्रदायस्य भवद्भिर्भ्रान्त्या वा ईर्ष्यासूया-
द्वेषैर्वा निर्मूलतायाः शास्त्रविरुद्धतायाश्चामरणं प्रतिपादनेऽपि न
कश्चित् प्रामाणिको भवद्वचनं विश्वस्यास्मत्सम्प्रदायेऽप्रामाण्यं श्रद्द-
ध्यात्। अतोऽस्मत्सम्प्रदायस्य सर्वश्रुतिस्मृत्यविरुद्धतया तद्वि-
रुद्धांशे नीलकण्ठादिव्याख्यानानामप्रामाण्यं वक्तुमशक्यमेव। श्रुति-
स्मृतिविरुद्धमार्गवैदेशिकानामस्मत्सम्प्रदायिनां गोष्ठीषु श्रुति-
स्मृतिपरित्यागस्य कः प्रसङ्गः? सर्ववैदिकमार्गविनाशकानां
भवतां नीलकण्ठादिकृतटीकास्वप्रामाण्योद्भावनमनुकूलमेव न
काचिद्धानिः। श्रुतिस्मृती अवलम्ब्यास्मत्सम्मतं प्रवृत्तमिति
डिण्डिमवादनेन भवद्भिरुद्घोषणे कृतेऽपि न प्रेक्षावान् तत्र
श्रद्धां कुर्य्यात्। न हि मृतसञ्जीवनी विषमित्युद्घुष्य विषं मृत-
सञ्जीवनीति लोकहिंसाविहारिणा केनचिन्निरन्तरमभिधानेऽपि
कश्चिज्जिजीविषुस्तद्वाक्ये श्रद्धां कुर्य्यादिति निरर्थक एव भवता-
मेतावान् प्रयास इति।

प्रश्न॰ अप्रमाणं चेद्विज्ञा अज्ञा वेति वक्तव्यमिति।

दुर्ज॰ इति पञ्चमं वाक्यम्, तत्रेदमुत्तरम्। अप्रामाण्या-
ङ्गीकृतत्वात् अर्थविशेषज्ञानांशे विज्ञत्वाङ्गीकारासम्भवात् अन्या-
र्थांशे विज्ञत्वेऽपि तेषां तदंशे ज्ञत्वमेवाङ्गीकर्तव्यमिति। न हि
वयं सर्वज्ञानां व्यासादिपरमर्षीणामज्ञत्वं ब्रूमः, किन्तु तत्कृत-
ग्रन्थं पुराणादिकं स्वाभिमते कुत्रचिदर्थविशेषे आग्रहविशेषेण

खण्डनेनैतत्प्रश्नवाक्योत्तरस्यापि खण्डितत्वस्यार्थतोलभ्यत्वादित्य-लमिति तत्खण्डनमिति ।

व्या० एतत्प्रश्नवाक्याव्यवहितपूर्ववाक्योत्तरखण्डन प्रवृत्तानां भवतां युक्तिपरश्वनामस्मद्युक्तिवज्रटङ्केन शतशः खण्डिततया तदुत्तरस्याव्याहततया तेनैतत्प्रश्नवाक्यमपि दत्तोत्तरमेवेति ।

प्रश्न० अज्ञाश्चेत् तदा सर्वजगद्विरुद्धवादिनो यूयं क इति विवेचनीयम् ।

दुर्ज० इति सप्तमं वाक्यम्, तत्रेदमुत्तरम् । न हि कस्य-चित् स्वाभिमतप्रतितन्त्रार्थवादिनो भारतादिटीकाकृतोऽज्ञत्वा-भिधानमात्रेणार्थविशेषे सर्वजगद्विरुद्धवादिनो वयम् । तथा के यूयमिति चेदस्मत्सम्प्रदायविरुद्धप्रतितन्त्रार्थाभिधायिवादि-करटिविभेदनक्षमयुक्तिनखपञ्चास्या इत्यवेहीति ।

टी० स्पष्टोऽर्थः ।

सज्ज० इति रामानुजीयाः, यत्त्वज्ञाश्चेत् तदा सर्वजग-द्विरुद्धवादिनो यूयं क इति विवेचनीयमित्यस्मत्प्रश्नोत्तरे शट-कोपशिष्यैर्भारतभागवतादिटीकाकृन्नीलकण्ठ-श्रीधरादिव्यवस्था-पितार्थविरुद्धार्थप्रतिपादकत्वस्य सर्वजगद्विरुद्धार्थवादित्वव्याप्यत्वे प्रमाणाभावेनास्मत्प्रश्नासाङ्गत्याभिप्रायकं श्रुतिस्मृत्यनुकूलतया-ऽवलम्बिषु शास्त्रसामग्रीराहित्यप्रयोज्यदौर्बल्याभिप्रायकं स्वो-येषु वैष्णवाभासेषु वास्तवश्रुतिस्मृतिविरुद्धशास्त्रतत्त्वानभिज्ञजन-वञ्चनार्थकस्वकल्पितशास्त्राभासालम्बेन प्राबल्याभिप्राय रूपके न तत्रेदमुत्तरमित्यारभ्येत्यवेहीत्यन्तकमुक्तं तदपि तुच्छतरम् ।

उपक्रमोपसंहारादिषड्विधलिङ्गावगततात्पर्य्यकवेदान्तवाक्यानुसारिव्याख्याकर्तृत्वबोधित-फलसाधनत्वांश-भ्रान्तिराहित्यात्मकशिष्टताकनीलकण्ठादिव्यवस्थापितार्थप्रतिपादकत्वे सर्वश्रौतस्मार्तपरम्परागतधर्मपरायणशिष्टजनविरुद्धवादित्वव्याप्यत्वस्य नीलकण्ठ-श्रीधरादिकृतव्याख्यानां वङ्गशः प्रचलनेन ।

"न ते गिरित्राखिललोकपाल-
विरिञ्चिवैकुण्ठसुरेन्द्रगम्यम् ।
ज्योतिः परं यत्र रजस्तमश्च
सत्त्वं न यद्ब्रह्मनिरस्तभेदम ॥"

इति भागवतीयाष्टमस्कन्धीयस्य शिवं प्रति देवानां वचनस्यानुसारित्वेन चार्थतोऽवगमात् परम्परागतशिष्टपरिगृहीतमन्वादिप्रोदितधर्मनिर्णयप्रवृत्तमहाराजाधिराजराजेन्द्रजयनगराधीशश्रित-याज्ञवल्क्यप्रभृतिप्रोदितश्रौतस्मार्तधर्मनिर्णयप्रवीणबादरायणप्रभृतिप्रोदितशास्त्रयाथात्म्यावगतिमण्डित-श्रौतस्मार्तधर्मविरोधिखलमण्डलपाणिनिप्रभृतिप्रोदिताङ्गनिपुणश्रौतस्मार्तधर्मविलोपनप्रवृत्तदग्धाङ्गच्छेदनार्थधृततर्कादिशास्त्रखण्डविदुषां वेदविरुद्ध-मार्गानुयायिपञ्चास्योत्पाटनार्थ-धृतशरभावताराणां विद्यमानत्वाच्चेत्यलमिति तत्खण्डनमिति ।

व्या० यत्तु यत्त्वित्यादिनाऽवेहीत्यन्तकमुक्तमित्यन्तेनास्मदुक्तं यथा शक्तिस्वावगतास्मत्तात्पर्य्येण सहृशटकोपशिष्यैरित्यलमित्यस्मदुपालम्भपूर्वकमनूद्य तदपीति तुच्छत्वं प्रतिज्ञायोपक्रमेत्यादिना सङ्गतमेव किञ्चिदुक्तं तन्न समीचीनम्। तथा हि शठेभ्यः

कुप्यतीति शठेषु कोपो यस्येति वाऽन्वर्थसंज्ञस्य शिवत्वमतिशयकरमेव न न्यूनतावहम् । किं च उपक्रमेत्यादिना यदुक्तं वेदान्तवाक्यानुसारिव्याख्येत्यादि न तत्र तादृशव्याकर्तॄत्वांशेऽशत्वमस्माभिस्तेषामुच्यते, किन्तु वेदान्तविरोधेन कृतव्याख्यानांश एव । एवं भवद्भिरपि नारायणीयोपाख्यानगतपञ्चरात्रप्रशंसापरवाक्यानां जनमेजयपर्य्यन्तं पञ्चरात्रशास्त्रप्रवृत्तिपरवाक्यानां च व्याख्यानांशे चोपरिचरानन्तरमेव सर्वपञ्चरात्रशास्त्रस्योच्छेदं जानद्भिरज्ञत्वस्य तेषां वक्तव्यत्वात्, किन्तु उपक्रमोपसंहाराद्यवगतवेदान्ततात्पर्य्यविरुद्धार्थवर्णनांशे तेषामज्ञत्वं वेदान्तवेदिभिः सर्वैरपि वक्तव्यमेव । न हि वेदान्तवाक्यानुसारेण व्याख्याकर्तॄत्वमात्रं शिष्टताबोधकम् अप्पयदीक्षितैर्विद्यासागरैश्च नयमयूखमालिनीव्याख्यावेदान्तसूत्राणां रामानुजमाध्वमतानुसारेण सर्वमतसंग्रहश्च कृत इति न तेषां तत्तन्मतसिद्धोपायादिषु यथार्थप्रतीतिरस्तीति कथं ते तन्मतस्थैः शिष्टत्वेनाङ्गीकार्य्याः । न हि तज्ज्ञानाभावमात्रेण शिष्टत्वं वक्तव्यम् । घटादीनामपि तत्त्वापत्तेः, किन्तु तेषूपायेषु जाता फलसाधनताप्रतीतिरभ्रमश्चेत्, किञ्च न फलसाधनत्वांशे भ्रान्तिराहित्यमात्रं शिष्टत्वं मद्यपानादौ मदविशेषरूपफलसाधनतां जानतामपि तत्त्वापत्तेः । किं च तादृशशिष्टताकनीलकण्ठादिव्यवस्थापितार्थप्रतिकपादकत्वे सर्वश्रौतस्मार्तपरम्परागतधर्मपरायणशिष्टजनविरुद्धवादित्वव्याप्यत्वं वदन्तो देवानां प्रियाः स्वाभिमतविरोधमपि न जानन्ति । तादृशनील-

कण्ठादिव्यवस्थापितार्थविरुद्धार्थप्रतिपादकत्वे इति तु युक्तम्, तदापि न निस्तारः। व्याप्यव्यापकयोरविशेषात्। किं च व्याख्यानां बहुशः प्रचलनं तादृशव्याख्याविरुद्धार्थप्रतिपादकत्वेन शिष्टजनविरुद्धवादित्वव्याप्यत्वावगमकम्। शाकुन्तलादिव्याख्यानां बहुशः प्रचलनेऽपि नीलकण्ठादिव्यासादिनिष्ठभारतीयार्थप्रतिपादकत्वे शिष्टजनविरुद्धवादित्वव्याप्यवगमाभावात् बहुशः प्रचलनस्य तादृशव्याप्यवगमत्वं हि लिङ्गविधया वक्तव्यम्। तच्चैवं नीलकण्ठादिशिष्टजनव्यवस्थापितार्थविरुद्धार्थप्रतिपादकत्वम्। विशिष्टशिष्टजनविरुद्धवादित्वव्याप्यं बहुशः प्रचलितग्रन्थप्रतिपादितार्थविरुद्धार्थप्रतिपादकत्वत्वादिति प्रयोगावसेयपरामर्शात् तद्बोध इति तदा बहुशः प्रचलितशाकुन्तल-तट्टीकार्थविरुद्धार्थप्रतिपादकत्वत्वरूपहेतुमति व्यासादिनिष्ठभारतार्थप्रतिपादकत्वे व्यभिचारः। न ते गिरिचेत्यादिनापि श्लोकेन शिवस्य न याथात्म्यबोधः तस्य प्रकरणस्य समुद्रमथनसमयनिःसृतमहाविषपानार्थं शिवप्रोत्साहने प्रवृत्तदेवकृत-स्तुतिरूपत्वात् स्तुतेश्चाविद्यमानगुणाभिधानेनापि सम्भवात्। यद्वा अन्तर्यामिपरतयापि स्तुतिसम्भवात् अन्तर्यामिगुणाभिधानं तस्य कथं स्तुतिरिति चेन्न अर्थवादाधिकरणसिद्धान्तीय-गुणवादस्तु इति सूत्रव्याख्याने विधेयस्य प्ररोचनार्था स्तुतिरिति तदिह कथमवकल्प्येत। यत्रान्यद्विधेयमन्यच्च स्तूयते यथा "वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति" इति वेतसावके विधीयते आपश्च स्तूयन्ते आपो वै शान्ता इति पूर्वपक्षं कृत्वा सिद्धान्तः कृतः, तदुच्यते।

गुणवादस्तु गौण एष वादो भवति, यत्सम्बन्धिनि स्तोतव्ये सम्बन्ध्यन्तरं स्तूयते अभिजनो ह्येष वेतसावकयोः । ततस्ते जाते अभिजनसंस्तवेनाभिजातः स्तुतो भवति यथाऽस्माकाभिजनो देवदत्तो आस्माकेषु स्तूयमानेषु स्तुतमात्मानं मन्यंत इति शवरस्वामिना अतोऽन्तर्य्यामित्वेन तस्य स्तुतिर्भवति । एवमसद्वृत्तान्वाख्यानं स्तुत्यर्थेन प्रशंसया गम्यमानत्वादिति शवरस्वामिनैवाविद्यमानगुणाभिधानस्यापि स्तुतित्वमुक्तम् । "यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्" इति भागवतीयतृतीयस्कन्धोक्तमपि न ते गिरिचेत्यादिश्लोकस्यान्यथासिद्धत्वव्यवस्थाकम् । तादृशान्यथासिद्धवचनानुसारित्वेन च न भवदुक्तार्थसिद्ध्याप्यवगमः सम्भवति । यद्यपि महाराजाधिराजराजेन्द्रजयनगराधीशाः परम्परागतशिष्टपरिगृहीतमन्वादिप्रोदितधर्मनिर्णयप्रवृत्ता इति सत्यम्, तथापि श्रुतिस्मृतिप्रतिपादितसद्धर्मविमुखभवादृशजनसंदंशिता अतएव स्वपूर्वराजैः सम्यक् प्रसिद्धपण्डितशिष्टजनसहायेन विचार्य्य विलिख्य स्वसरस्वतीभण्डारे लेखद्वारा स्थापितात् मतो धर्मात्प्रच्याविता इति तत्कृतत्वेन न भवतां शिष्टत्वसिद्धिः । किं च याज्ञवल्क्यप्रभृतिप्रोदितेत्यादिकं श्रौतस्मार्तधर्मविरोधीत्यादिकं च युष्मदस्मदर्थयोरित्यादिना भाष्यकारोक्तरीत्या विपरीतमध्यारोपितं भवद्भिः दग्धाङ्गभचकाणां तच्छेदनं कैमुत्यन्यायसिद्धमिति न पुनर्वक्तव्यम् । भवतां शरभावतारत्वे तदुपमर्दको गण्डभेरुण्डावतारो पञ्चतिमुखोऽस्तीति विभावनीयं पुराणार्थकचिन्तकैरिति ।

प्रश्न० "यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
त्वदुपासा जगन्नाथ! सैवास्तु मम गोपते॥"

इत्यादिवाक्यानामर्थोऽपि कया रीत्या भवतीति विवेचनीयम्।

दुर्ज० इत्यष्टमं वाक्यम्, तत्रेदमुत्तरम्। शैवैः शिवपरत्ववादिभिर्बहुतरमुपलभ्यमानानां शिववाक्यानां भगवति स्वस्य शेषत्वपारतन्त्र्यबोधकानां भगवतः सर्वथा परत्वबोधकानामन्यवाक्यानां च शिवस्य परमवैष्णवत्वप्रतिपादकानां भगवदुपासन-तत्कैङ्कर्य्यादिप्रतिपादकानां पार्वतीषण्मुखादिकं प्रति तत्त्वोपदेशप्रवृत्तशिववाक्यानां विष्णुतत्त्वप्रतिपादकानां स्वस्य भगवत्प्रसादमात्रोपजीव्यत्वबोधकानां यया रीत्यार्थो वर्ण्यते, "यस्त्वां द्वेष्टि" इत्यादिकं तु न किञ्चिद्विपन्नम्। अनेककालमारभ्य बहुतरं तपः कुर्वतस्ताद्दृशतपोवशीकृतं भक्तवत्सलं भगवन्तं प्रति यथा मम सर्वलोकपूज्यता स्यात्, तथा कुर्वित्यसकृच्छिवेन प्रार्थितस्य भगवतो विष्णोरवतारावस्थायां स्वप्रतिज्ञातोपपत्त्यर्थः व्रतधारणतपश्चरणादिपूर्वकं पुत्रप्राप्तिं प्रार्थयमानस्य किमनुपपन्नम्। किं च भगवान् हि ज्ञान्येकजीवातुर्ज्ञानिमात्रे ज्ञानी त्वात्मैव मे मतमिति वादी ज्ञान्यग्रेसरं शिवं प्रत्येवं वदति चेत् किमाश्चर्य्यम्? "मम प्राणा हि पाण्डवाः" इति स्वाश्रितपाण्डवमात्रे स्वधारकत्वमभिहितवानिति। एवमेव वचनं पाण्डवविषये सभापर्वणि श्रूयते। त्वदुपासेत्यर्द्धं स्वकृतपूर्वप्रतिज्ञानुगुणमिति न काचिदनुपपत्तिरिति।

टी० स्पष्टोऽर्थः।

मज्ज॰ इति रामानुजीयाः, यत्तु,—

“यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
त्वदुपास्ता जगन्नाथ! सैवास्तु मम गोपते॥

इति वाक्यानामर्थोऽपि कया रीत्या भवतीति विवेचनीयम्। इत्यत्नप्रश्नोत्तरे रामानुजीयैस्तत्रेदमुत्तरमित्यारभ्य न काचिदनुपपत्तिरित्यन्तमुक्तम्। शिवस्य सेवकत्वाभिप्रायकं विष्णोः सेव्यत्वाभिप्रायकं स्वाभिमतपारमार्थिकभेदसंस्थापनतात्पर्य्यकमुक्तं तदसङ्गतम्।

“प्रतिसर्गं प्रसूतानां ब्राह्मणाः शास्त्रविस्तरम्।
उपदेष्टा स एवादौ कालावच्छेदवर्त्तिनाम्॥
ईशानः सर्वविद्यानां स एवादिगुरुर्बुधाः।
तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिः॥”

इति शिवपुराणीयवचनेन ब्रह्मविष्णुरुद्रस्तुत्यनन्तरम्,—

“एभ्यः परतरो देवस्त्रिमूर्तिः परमा तनुः।
माहेश्वरी त्रिनयनी योगिनां शान्तिदा सदा॥”

इति कूर्मपुराणीयवचनेन च शिवस्यैव सर्वसेव्यत्वावगमात्।

“यस्यान्तस्थानि भूतानि यस्मात् सर्वं प्रवर्त्तते।
तमाहुस्तत्परं तत्त्वं स देवः स्यान्महेश्वरः॥”

इति ऋग्वेदाच्च तदवगमात्। न च विष्णोः सर्वसेव्यत्वप्रतिपादकानां का गतिरिति वाच्यम्, विष्णोः शिवाभिन्नत्वतात्पर्य्यकतायाः,—

“एनमेके वदन्त्यग्निं नारायणमथापरे।

इन्द्रमेके परे प्राणान् ब्रह्माणमपरे जगुः ॥
ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः ।
एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिताः ॥"

इति कूर्मपुराणीयवचनादवगमात् । तस्माद्विष्णुशिवयोर्न्यूनाधिकभावेन च वर्णनं शास्त्रतात्पर्य्याज्ञानमूलकम् । दग्धाङ्गकृतं नादरणीयम् । मतामित्यस्तमिति तत्खण्डनमिति ।

व्या० अत्र यत्त्वित्यादिनाऽस्मदुक्तं साभिप्रायमनूद्य तदसङ्गतमिति प्रतिज्ञाय प्रतिसर्गमित्यादिना शिवकूर्मपुराणयोस्तामसयोः कानिचिद्वचनानि स्वाभिमते शिवस्य मैश्यत्वे प्रमाणतयोपन्यस्य किञ्चिद्दुर्वचनमपि स्वगोष्ठीपरिचितमुपन्यस्य तदनादरमित्युक्त्वा तत्खण्डनमित्यभिचारमन्त्रोऽपि पठितो जयनगरमहाराजाधिराजीयैः । तत्र शिवमाहात्म्यपर-तामसपुराणवचनानां प्रागुपन्यस्तानामुत्तरेणैवोत्तरस्योक्तप्रायत्वात् पृथक् यत्नोऽव्यर्थः । "यस्यान्तस्थानि भूतानि" इति ऋग्वेदवाक्यस्य महेश्वरपदं न रुद्रपरम् ।

"यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः परमेश्वरः ॥"

इति तैत्तिरीयोपनिषद्वाक्येनैकार्थत्वात् । तत्र महेश्वरपदं च विष्णोरेव वाचकः,—

"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा ।
स्रवत्यनोऽङ्कृतं पूर्वं परस्ताच्च विशीर्य्यते ॥"

इति स्मृतिवचनेन वेदाद्यन्तयोरवश्यं वक्तव्यत्वेनाभिहितस्य

कथञ्चिद् योजयतां व्याख्यातॄणामेव। अतः सप्तमवाक्ये वक्ष्य-माणदूषणाप्रसक्तिः। अस्माभिस्तेषामज्ञत्वानभिधानेऽपि तत्सम्प्र-दायस्थैरेवान्यैः कृतायां टीकायां तदुक्तार्थनिराकरणेनार्थान्त-रस्य वर्णितत्वात् अन्यतरस्याज्ञत्वं वक्तव्यमेव। 'कथमन्यथाप्यय-दीक्षितकृतसिद्धान्तलेशग्रन्थेऽप्येकैकस्मिन् विषयेऽद्वैतिप्रतितन्त्रा-र्थानामनेकरूपेण परस्परविरुद्धेन वर्णनस्य तदानुगुण्येन भाष्य-योजनस्य च दर्शनेन तत्तदर्थविशेषमभिदधतां सर्वेषां प्रामा-णिकत्वं स्यादिति।

टी॰ अन्यथेति एकस्मिन्नर्थे विरुद्धाकारद्वयं वदतोरेकस्य तदंशेऽज्ञत्वानङ्गीकारे इत्यर्थः।

मञ्ज॰ इति रामानुजीयाः, यत्त्वप्रमाणं चेद्दिशा अज्ञा वेति वक्तव्यमित्यस्मत्प्रश्नोत्तरेऽङ्कितैरस्मदाचार्य्यकृतटीकाविरु-द्धांशप्रतिपादकटीकाकर्तृत्वेन नीलकण्ठ-श्रीधरादिष्वज्ञत्वाभि-प्रायकं स्वाचार्य्याणां रामानुजप्रभृतीनां श्रुतिस्मृतिसूत्रानु-सारिग्रन्थकर्तृत्वेन विज्ञत्वाभिप्रायकं स्वसम्प्रदायिग्रन्थकाराणां च परस्परापेक्षयापि सुज्ञत्वाभिप्रायकं तच्चेदमुत्तरमित्यारभ्य स्यादित्यन्तकमुक्तम्, तदसङ्गतम्। तदाचार्य्याणामज्ञत्वस्य स्का-न्दीयशङ्करसंहितीय—

"यथा वेदेषु शास्त्रेषु विश्वाधिक उमापतिः।
पुरुषः परमः साक्षात् पतिः पाशविमोचकः॥
परब्रह्म परं धाम परं ज्योतिरनाकुलम्।
मङ्गलं मङ्गलानां च पावनानां च पावनम्॥

सर्वमङ्गलकोपेतमुत बभ्रुः सुमङ्गलः ।
आगमान्तगिरो नित्यमद्वैतं प्रवदन्ति हि ॥
तद्वदेव पुराणानि शिवं साम्बं सदाशिवम् ।
स्वतन्त्रमेकमद्वैतं प्रवदन्ति निरङ्कुशम् ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
भविष्यं नारदीयं च मार्कण्डेयमतः परम् ॥
आग्नेयं ब्रह्मवैवर्तं लैङ्गं वाराहमेव च ।
स्कान्दं च वामनं चैव मात्स्यं कौर्मं च गारुडम् ॥
ब्रह्माण्डं चैव पुण्योऽयं पुराणानामनुक्रमः ।
तत्र शैवानि शैवं च भविष्यं च द्विजोत्तमाः ॥
मार्कण्डेयं तथा लैङ्गं वाराहं स्कान्दमेव च ।
मात्स्यमन्यत् तथा कौर्मं वामनं च मुनीश्वराः ॥
ब्रह्माण्डं च दशेमानि त्रीणि लक्षाणि सङ्ख्यया ।
ग्रन्थानां महिमा सर्वैः शिवस्यैव प्रकाश्यते ॥
असाधारणया मूर्त्या नाम्नासाधारणेन च ।
वदन्ति शिवमेतानि शिवस्तेषु प्रकाश्यते ॥
विष्णोर्हि वैष्णवं तद्वत् तथा भागवतं तथा ।
नारदीयपुराणं च गारुडं वैष्णवं विदुः ॥
ब्राह्मं पाद्मं ब्रह्मणो द्वे अग्नेराग्नेयमेककम् ।
सवितुः ब्रह्मवैवर्तं स्त्वेवमष्टादश स्मृतम् ॥
दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः ।
अद्वैयानि द्विजवरैस्तेषां धर्मस्तु तत्र यत् ॥

वैष्णवानि च चत्वारि तामसानि मुनीश्वराः।
क्षत्रियाणां श्रौत्रधर्मस्तेषु तद्देवता हरिः॥
ब्राह्मे तु राजसे शैवे सेव्ये सर्वत्र सम्मते।
तस्माच्छैवानि विप्राणां पुराणानि हितानि हि॥
तस्मादेतेषु सर्वात्मा साम्बः सर्वोत्तमोत्तमः।
पूज्यः सर्वान् सुरा हित्वा वैकुण्ठप्रमुखानपि॥
सर्वज्यायानणीयांश्च स्तब्धो वृक्ष इव शिवः।
दिवि तिष्ठति सर्वात्मा तेन पूर्णमिदं जगत्॥
यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दमस्य यो वेत्ति न भयं तस्य कुत्रचित्॥
अद्यापि ब्रह्मविष्णुभ्यां न दृष्टोऽयं महेश्वरः।
पशूनां पतिरीशानो ब्रह्माद्याः पशवः स्मृताः॥"

इत्याकारकवाक्यकदम्बेन श्रुतिस्मृत्यनुसारेण शिवस्यैव सर्वात्मत्वप्रतिपादकेनावगमात्। नीलकण्ठप्रभृतीनां तूपक्रमोपसंहारावगततात्पर्य्यकवेदान्तवाक्यानुसारिव्याख्याकर्तृत्वेन विज्ञत्वस्यावगमात्। यदपि परस्परापेक्षया विरुद्धार्थाभिप्रायकमुक्तं, तदपि तुच्छम्। श्रुतिस्मृतिप्रतिपादित-द्विजात्युचितधर्मस्य सर्वैरस्मदाचार्य्यैरेकरूपतयाऽङ्गीकारेणेतरप्रकृतिप्रत्ययार्थांशे परस्परापेक्षया विरुद्धार्थप्रतिपादकत्वेऽप्यस्मदाचार्य्याणां क्षतेरभावाच्च। तस्मात् मात्सर्य्यमुत्सार्य्य श्रुतिस्मृतिप्रतिपादितस्वस्वोचितधर्मानुसारेण स्थेयं भवद्भिरन्यथा "अनाश्रमी न सन्तिष्ठेत्" इत्येतच्छास्त्रोल्लङ्घनप्रयुक्तप्रत्यवायो न केनापि प्रका-

वेण परिहर्तुं शक्यः स्यात् । न च पराशरपुराणप्रथमाध्याये,—

"अथातः संप्रवक्ष्यामि ज्ञानानुत्पत्तिकारणम् ।"

इत्युपक्रम्य,—

"वामपाशुपतादीनामश्रौतानां परिग्रहः ।
पाञ्चरात्रागमास्यापि ज्ञानानुत्पत्तिकारणम् ॥"

इत्यादीनां का गतिरिति वाच्यम्,

"शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च स स्मृतः ।
श्रुतिसारमयः श्रौतः स्वतन्त्र इतरो मतः ॥"

इति वायुसंहितीयवचनप्रमाणेन शैवागमस्य द्वैविध्यावगत्या श्रौतपाशुपतस्य,—

"एष पाशुपतो योगः सेवनीयो मुमुक्षुभिः ।
भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुतिः ॥

इत्यादित्यपुराणवचनेन मोक्षसाधकत्वावगमेन च तेषां वाक्यानामश्रौतपाशुपतनिन्दाविषयकत्वात् । वस्तुतस्तु

"मायामयमिदं देवि ! वपुर्मे न तु तात्विकम् ।
सृष्टिस्थित्युपसंहारक्रियाजालोपबृंहितम् ॥
अतान्यदात्मनो रूपं द्वैताद्वैतविवर्त्तितम् ।
भावाभावविनिर्मुक्तमाद्यन्तरहितं प्रिये ! ॥"

इति पद्मपुराणीयगीतामाहात्मीयात् श्रियं प्रति भगवद्वचनात् तस्य,—

"शृणु सुश्रोणि सम्यक् त्वं गीतासंस्थितिमात्मनः ।

वक्त्राणि पञ्च जानीहि पञ्चाध्यायाननुक्रमात् ॥
दशाध्याया भुजाश्चैकमुदरं द्वे पदाम्बुजे ।
एवमष्टादशाध्यायी वाङ्मयी मूर्तिरीश्वरी ॥
जानीहि ज्ञानमात्रेण महापातकनाशिनी ।"

इति वचनाच्च विष्णुशिवयोः शुद्धचैतन्यस्वरूपावगत्या स्वरूपतस्तयोरभेदे निश्चिते शिवोत्कर्षबोधकवाक्यानां विष्णूत्कर्षबोधकवाक्यानां च विष्णुशिवान्यतरमूर्तिध्यानस्य निःश्रेयससाधनीभूतब्रह्मज्ञानसम्पादकत्वेनान्तःकरणशोधनद्वारा प्राशस्त्ये तात्पर्य्यमेवेत्यलमिति तत्खण्डनमिति ।

व्या० यत्तु यत्त्वित्यादिना स्यादित्यन्तकमुक्तमित्यन्तेनास्मदुक्तं स्वाभिप्रायमनूद्य तदसङ्गतमिति प्रतिज्ञायास्मदाचार्य्याणामज्ञत्वस्य स्वाभिमतस्योपपादनार्थं शिवमहिमबोधनैदम्पर्य्येण प्रवृत्तस्कन्दपुराणवचनजातमुपन्यस्तम्, तदसङ्गतम् । प्रागुक्तानाम् एतत्स्कन्दपुराणवचनेन सात्त्विकत्वेन शिवमाहात्म्यप्रतिपादकत्वेन प्रतिपादितेषु दशसु पुराणेष्वन्तर्गतस्य अन्यच्च राजसत्वेन परिगणितस्य मत्स्यपुराणस्य वचनानां मध्ये,—

"सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ।
तेष्वेव योगसंसिद्धाः ——————————"

इति वचनेन हरिध्यानस्यैव मोक्षसाधनत्वावगत्या तदनुरोधेन हरिप्रीत्यर्थधर्मानुष्ठाननिष्णातानामज्ञत्वस्य वक्तुमशक्यत्वात् । अन्यथा "न किरिन्द्र त्वदुत्तरः त्वं हि ज्यायान्नोकनीयान्" इत्यार्थवादिकश्रुतिवाक्येनेन्द्रस्यैव सर्वोत्कर्षप्रतिपादनात् शिवस्यापि

त्वदभिमतसर्वोत्कर्षासिद्धिप्रसङ्गात्। अतस्तत्त्वनिर्णये कर्तव्ये तत्त्वपक्षपातिप्रशंसापरपुराणानि विहाय श्रुत्यैव तस्य कर्तव्यतया श्रुतौ च सर्वकारणवाक्यगतसद्ब्रह्मादिशब्दानां कुत्रचिदेकस्मिन् पर्य्यवसानस्य वक्तव्यतया तस्य च छागो वा मन्त्रवर्णादित्युक्तन्यायेन सामान्यशब्दानां विशेषे कर्तव्यतया सद्ब्रह्मात्महिरण्यगर्भाकाशप्राणज्योतिः शम्भुशिवादिशब्दानां कारणवाक्येषु कारणवस्तुबोधकतयाभिमतानां सर्वविशेषस्वातिरिक्तविशेषान्तररहितस्यान्यपरत्वेऽसम्भवत्त्वकस्य नारायणशब्दस्य सर्वश्रुत्युपसंहारभूतनारायणानुवाके कारणवाक्यगतसद्ब्रह्मादिकतिपयशब्दसामानाधिकरण्येन पठितस्यार्थे पर्य्यवसानस्य वक्तव्यतया नारायणस्य सर्वकारणत्वस्य सिद्ध्या कारणं तु ध्येय इति श्रुतिवाक्येन कारणभूतस्य नारायणस्यैव मुमुक्षुभिर्ध्येयत्वावगत्या तस्यैव मोक्षप्रदत्वावगमात् केवलशिवप्रशंसावाक्येनान्यप्रशंसावाक्येन वा तत्त्वनिर्णयासम्भवेन हितपुरुषार्थानां निर्णयासम्भवेन च शिवस्य च प्रागुदाहृतका एव माध्यन्दिनान्तर्य्यामिब्राह्मणसुबालोपनिषद्वाक्येन च प्रतिपादितस्य नारायणगतसर्वान्तर्य्यामित्वस्य विरोधेनोक्तवाक्येनान्तर्य्यामित्वप्रतिपादनासम्भवात् नारायणस्य सर्वकारणत्वसर्वान्तर्य्यामित्वमुमुक्षूपास्यत्वमोक्षप्रदत्वानि प्रतिपादयतामस्मदाचार्य्याणामज्ञत्वाभिधानासम्भवात्। एवं "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इत्यादिश्रुत्याभेदज्ञानस्योपासनात्मकस्य मोक्षोपायत्वनिश्चयात् अन्यथा ज्ञानेन मोक्षफलासम्भवात् भेदस्य याथार्थ्याभ्युपगमा-

वश्यक्ततया तद्विपरीतस्वरूपाभेदप्रतिपादनस्याप्रमाणप्रयुक्तत्वं वक्तव्यमेवेति निरुक्तव्याख्यातॄणामज्ञत्वं सुदृढ़मेव तदंशे यत्तु यदपीत्यादि क्षतेरभावादित्यन्तकमुक्तं तदप्यसारम्। यदि भवदाचार्य्याः श्रुतिस्मृतिविहितं धर्मं स्वीकृतवन्तस्तदा भवदाचार्य्याणां न काचित् क्षतिः। सुरगुर्वादिवत् किञ्चित्प्रतिपादयन्तु, किन्तु तदभिप्रायमज्ञात्वा

"धर्मव्यतिक्रमो दृष्टो महतां साहसस्तथा।
तत्प्रयुक्तः प्रयुञ्जानः क्लिश्यत्यन्तरितो जनः॥"

इत्यादिकमननुसन्धाय तदुक्तमार्गे सञ्चरतां किञ्चिदल्पं महद्वाऽनिष्टं भवति चेत्, तत्प्रयुक्तोऽपरिहार्य्यः प्रत्यवायः। तस्मादित्यादिना यदुक्तम्, तन्मात्सर्य्यादिदुर्गुणानुमापकवचोविशेषवतामेवोचितम्। अतएव न चेत्यादिशङ्कासमाधानवाक्यान्यप्युक्तोत्तराणि तस्योपपुराणस्य तामसत्वेन तामसपुराणान्तरसमानयोगक्षेमत्वात्। यत्तु वस्तुतस्त्वित्यादिना तत्खण्डनमित्यन्तेनोक्तम्, तदपि मन्दम्। न हि मायामयमिति पदं ह्याश्चर्य्यरूपत्वं भगवच्छरीरस्य वदद्ज्ञानकल्पितत्वं तस्य वदति मायाशब्दस्याश्चर्य्यपरत्वस्य तेन सहस्रं तच्छम्बरस्याशुगामिना बालस्य रक्षतो देहमैकैकश्येन सूदितमिति वचनेनेनावगम्यते। तत्र मायाशब्दस्य कल्पितत्वपरत्वे ज्ञानमात्रनिवर्तनीयस्य तस्य सुदर्शनकर्तृकनिषूदनव्यापारकर्मत्वासम्भवात्, न तु तात्विकमित्यपि नापारमार्थ्यबोधकम्। "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः तस्य यथा कप्यासंपुण्डरीकमेवमेवाक्षिणी तस्योदितिनाम स उदेति

ह वैः सर्वेभ्यः पाप्मभ्यो य एवं वेद” इत्यन्तरादित्यविद्यायां मोक्षसाधनोपासनकर्मतया अतस्यापारमार्थिकत्वासम्भवात्, किन्तु “इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ” इत्याद्युक्तरीत्या भक्तानुग्रहार्थं परिगृहीतानां भगवद्विग्रहाणामनित्यत्वमभिदधाति तथैव लौकिकैरपि अनित्येषु मिथ्याशब्दो नाम्रातवेदान्तग्रन्थैरपि प्रयुज्यते। एवं पञ्चवक्त्राणीति अनेनापि न शिवदेहप्रत्यभिज्ञानमतो न शिवदेहस्य विष्णुचैतन्यसम्बन्धाभिधानेन चैतन्यैक्यं साधनीयम्। सर्वेषामप्यात्मनां चैतन्यस्वरूपावगतिः समानैव न तावता तयोः स्वरूपतो भेदो निश्चेतुं शक्यः घटशरावादीनां मृत्स्वरूपत्वावगतावपि तेषां स्वरूपतोऽभेदानिश्चयात्। अतः शिवोत्कर्षबोधकानामिव विष्णूत्कर्षबोधकानामपि प्रशंसामात्रतात्पर्य्यकतया न स्वार्थेऽप्रमाण्यं वक्तुमुचितमिति कृतं पल्लवितेन।

प्रश्न० विज्ञाश्चेत् तदा तल्लेखः प्रमारूपः।

दुर्ज० इति षष्ठं वाक्यम्, तत्पूर्वोक्तवाक्योत्तरेण दत्तोत्तरम्।

टी० पूर्वोक्तेत्यादि तेषां सर्वांशेऽज्ञत्वस्य विज्ञत्वस्य चानङ्गीकारात् यदंशे तेषां विज्ञत्वं तल्लेखः प्रमारूपः अन्यत्र नेति भाव इति।

सज्ज० इति रामानुजीयाः, यत्तु विज्ञाश्चेत् तदा तल्लेखः प्रमारूप इति अस्मत्प्रश्नोत्तरेऽङ्कितैस्तत्पूर्वोक्तवाक्योत्तरेण दत्तोत्तरमित्युक्तम्, तत्तुच्छम्। एतत्प्रश्नवाक्याव्यवहितपूर्ववाक्योत्तर-

प्रणवस्य स्वरस्य प्रकृतिरकारः। तद्रूपतापत्तौ प्रणवोऽकाररूपो भवति। तस्य यो वाच्यः स महेश्वर इति ज्ञापनात्। अकारस्य नारायणस्यैव वाचकः अकारो वै विष्णुः अकारो विष्णुवाचकः अ इति भगवतो नारायणस्य प्रथमाभिधानमभिदधतेत्यादिभि-स्तथैव निश्चयात् इति। अतः शास्त्रसम्मते विष्णुशिवयोरधिक-न्यूनभावे न कोऽपि दोषः इति।

प्रश्न० भवतामाह्निकं कीदृशम्? इति।

दुर्ज० इत्यष्टमः प्रधानप्रश्नः। यथा वैदिकानामाह्निकाग्रे-सराणामिति तत्रोत्तरमिति तदनुबन्धीन्यष्टौ वाक्यानि तत्रेद-मादिमम्।

टी० परमवैदिकानां श्रुतिस्मृत्युक्तसकलोपायोपेयेषु वि-श्वासवतामस्मत्सम्प्रदायिनामन्यादृशाह्निकासम्भवादिति भावः।

सज्ज० इति रामानुजीयाः, यत्तु भवतामाह्निकं कीदृश-मित्यष्टमप्रश्नोत्तरेऽङ्कितैर्यथा वैदिकानामाह्निकाग्रेसराणामि-त्युत्तरमुक्तं तदपि तुच्छम्। तेषां शूद्राचार्य्यप्रवर्तिततयावल-म्बितत्वेन श्रौतस्मार्तकर्मानर्हतयाऽऽह्निक-वैदिकशिष्टजनसाम्यस्य वक्तुमशक्यत्वादित्यलमिति तत्खण्डनमिति।

व्या० यत्तु अस्मदुक्तप्रश्नोत्तरखण्डनाय प्रवृत्तैरसल्लक्षणैरु-परितनावान्तरवाक्यप्रयोगप्रवृत्तस्वीयजिह्वाखण्डनं तेषामित्या-दिनाऽयुक्तत्वादित्यन्तेन कृतं तत्तुच्छम्। यदि अस्मदीयसम्प्र-दायिनां परमवैदिकानामपि आह्निकस्य श्रुतिस्मृत्येकनिरूपितस्य शूद्राचार्य्यप्रवर्तितत्वेत्यादिना दूषणं भवदुक्तं शक्यं स्यात् तदा

कौशिक-शौनकादीनामपि किं बहुना शास्त्रीयसन्मार्गकण्टकाय-
मानैर्भवादृशैर्विना सर्वेषामपि परमर्षिस्मृतीनां धर्मव्याधा-
द्यक्रमस्थविद्यादिश्रद्धावतामाह्निकस्यापि तदेव दूषणं स्यात्।
"अन्त्यादपि परं धर्मम्" इति स्मरतो मनोरनाप्तत्वं स्यात्, तेन
तद्वचनेन लोकविप्लवस्य कृतत्वात्। किं च शिष्टजनसाम्यं तद्भेद-
घटितं शिष्टाग्रगण्येषु अस्मासु कथं वक्तुं शक्येत? इदं च
वाक्यं घुणाक्षरन्यायेन भवन्मुखान्निःसृतमिति जानीम इति।

प्रश्न० प्रातःकृत्यादि सन्ध्यावन्दनान्तं कर्म कया श्रुत्या स्मृत्या
वा क्रियत इति।

दुर्ज० तत्रेदमुत्तरम्। सन्ध्यावन्दनादि नित्यं कर्म नैमित्तिकं
गृह्यकारेण तदसाधारण्येनोपयोजितैः श्रुतिमन्त्रैर्गृह्यकारोक्त-
रीत्यैव क्रियते, श्रौतं तु कल्पोक्तरीत्या प्रातःकृत्यं देहशुद्ध्या-
दिकं स्मृतिवचनसंग्रहीतृस्मृति-सार्वभौमादिकृताह्निकग्रन्थ-
प्रतिपादितया रीत्येति।

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, यत्तु प्रातःकृत्यादिसन्ध्या-
वन्दनान्तं कर्म कया श्रुत्या स्मृत्या वा क्रियते इत्यस्मत्प्रश्नोत्तरे
रामानुजैस्तत्रेदमुत्तरमित्यारभ्य रीत्येत्यन्तकमुक्तं तदसङ्गतम्।
सर्वप्रश्नाद्यप्रश्ने भवच्छब्दस्योपादानेन तस्योत्तरत्रापि सम्बन्धस्य
निर्विवादतया अत्रापि भवच्छब्दसम्बन्धेनैतत्प्रश्नस्य भवत्कर्तृक-
सन्ध्यावन्दनान्तकर्मबोधकश्रुतिस्मृतिविषयकत्वेऽवस्थिते गृह्य-
कारायुक्तसरणेः शूद्राचार्यरुद्राक्षविभूतिधारणनिन्दाकरणेन

भवद्भिः परित्यक्ततया तत्कृतव्यवस्थयाऽस्मत्प्रश्नोत्तरस्य वक्तुमशक्यत्वात् इत्यलमिति तत्खण्डनमिति ।

व्या० यत्तु इत्यारभ्य तदसङ्गतमित्यन्तेनास्मदुक्तेरसाङ्गत्यं प्रतिज्ञाय सर्वप्रश्नाद्यप्रश्न इत्यादिना यदुपपादनमिव कृतं तत्तुच्छम्, सर्वप्रश्नाद्यप्रश्नः । तत्र सम्प्रदायशब्दस्य कोऽर्थः ? इति तत्र भवच्छब्दो नास्ति भवन्तो यदि भवदुक्तमपि न जानन्ति, तदाऽन्योक्तं कथं जानीयुः ? अतएवासङ्गतमेवोच्यते, तत्र तत्र भवद्भिः । तत्र भवच्छब्दस्याध्याहारोऽभिप्रेत इति भवतामाशयस्तदा सोऽपि न सम्भवति । तत्प्रश्नोत्तरोपरि भवदुक्तसम्प्रदायशब्दार्थवर्णनादीनामसाङ्गत्यापत्तेः । किं च पञ्चमप्रधानप्रश्नीयावान्तरद्वितीयसप्तमवाक्ययोः षष्ठप्रधानप्रश्ने सप्तमप्रधानप्रश्ने च भवच्छब्दान्वयस्य बाधः । किं च सर्वेषां वैदिकानां शाखाभेदेन मन्त्राणामनुष्ठानक्रम[illegible] भिन्नभिन्नत्वेऽपि तद्विधायकश्रुतिः स्मृतिर्वा न विद्यते भवद्भिर्भवत्कर्तृकसन्ध्यावन्दनबोधकश्रुतिः स्मृतिर्वावगता तदा सर्वेषां सावगतेति जिज्ञासा न सम्भवति । किं च गृह्यकाराद्युक्त-सरणिरस्माभिस्तदुक्तमार्गेणैवेषत्स्खलनं विना सञ्चरद्भिः परित्यक्ता स्यात्, तदा तद्वेदेशिकैर्भवद्भिः कथमपरित्यक्ता, न हि शूद्राचार्य्यभस्मरुद्राक्षधारणादिकमस्मद्गृह्यकारेणापस्तम्बेन नित्याङ्गतयोक्तम् अस्माभिर्वा तन्निन्दा क्रियते । न हि तद्धारणमात्रेण तन्निन्दा पर्य्यवस्यति । अन्यथाऽश्वमेधादिश्रौतानुष्ठानशून्यैस्तन्निन्दा क्रियत इत्यपि स्यात् भवत्प्रश्नस्य तत्कृत व्यवस्थां विनोत्तरं न केनापि वैदिकेन वक्तव्यम् इति ।

प्रश्न० विधानग्रन्थश्च कीदृशः ? इति।

दुर्ज० इति द्वितीयं वाक्यं श्रौतस्मार्तकर्मसु मीमांसिताः श्रुतयः स्मृतयश्च तथा विधायकग्रन्थाः अनुष्ठानक्रमप्रतिपादकास्तु कल्पगृह्यसूत्रादयः श्रौतग्रन्थाह्निकग्रन्थाश्चेति।

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, यत्तु विधानग्रन्थाश्च कीदृशा इत्यस्यप्रश्नस्य यथा भवद्भिरेकजात्युचितशंखचक्राद्यङ्कनादीन् त्रैवर्णिके प्रवर्तयितुं श्रुतयः स्मृतयश्च स्वयं प्रकल्पिता एवं विधानग्रन्थः स्वय कल्पितश्रुतिस्मृतिसन्दर्भरूपः क इत्यभिप्रायकस्योत्तरे रामानुजीयैः द्वितीयं वाक्यमित्यारभ्य ग्रन्थाश्चेत्यन्तकमुक्तं तदपि तुच्छम्। उक्तयुक्तेर्गृह्यसूत्रादिषु तेषामनुष्ठानपर्य्यवसायिनामङ्कनादीनां तेष्वनुक्तेश्चेत्यलमिति तत्खण्डनमिति।

व्या० अत्र यथेत्यादिना यदभिप्रायवर्णनं निर्मूलपुरुषैः कृतं तन्निर्मूलमेव चतुर्वर्णोचितानां शंखचक्राङ्कनादीनामेकजात्युचितत्वमस्त्येव सत्यदयादीनामिव। किं च यदि स्वयं कल्पितेत्यनेन साक्षादस्मत्कल्पितत्वमभिप्रेतमुतास्मदाचार्य्यकल्पितत्वं ? यद्याद्यः पक्षस्तदा अस्मज्जन्मनः पूर्वभाविना भास्करदीक्षितादिना कृतेषु ग्रन्थेषु यजुःसामवेदादिसंहितासु पठ्यमानानां श्रुतीनां तदुपबृंहणस्मृतीनां च लेखनं कृतम्। यदि द्वितीयः पक्षस्तदाऽस्मत्प्रथमाचार्य्येण श्रीमन्नारायणेन सर्वाः श्रुतिस्मृतयः कृतमाया एव "तस्य वा एतस्य महतो भूतस्य निश्वसितमेतदृग्वेदः

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः स्मृतीनां च सर्वासां श्रुतिमूलकत्वाच्चेति अस्मदसाधारण-धर्मसाधारणधर्मप्रतिपादकाश्च श्रुतयः स्मृतयश्च श्रीमन्नारायण-कल्पिता एव कल्पितत्वं च प्रथमप्रवर्तनमेवेति विश्वामित्रस्य सूक्तमित्यादिषूक्तमेव वेदनित्यत्वव्यवस्थापकैरिति न तद्विरोधः। किं चोक्तयुक्तिस्तु पूर्वमेव निराकृता। गृह्यसूत्रे शंखचक्रादीना-मनुक्तत्वेऽपि वसिष्ठस्मृत्यादिषु तान्युक्तान्येवेति।

प्रश्न० गायत्रीजपस्यावश्यकताऽनावश्यकता वा?

दुर्जे० इति तृतीयं वाक्यम्, तत्रेदमुत्तरम्। त्रैवर्णिकाधि-कारिविशेषाणां वर्णाश्रमधर्मत्वेनावश्यकता वैष्णवधर्मत्वेनाना-वश्यकता गायत्र्यनधिकारिणामत्रैवर्णिकानां सर्वथाऽनावश्यता सर्वेषां वैष्णवत्वेन मन्त्रजपादेरेवावश्यकत्वादिति।

टी० त्रैवर्णिकेत्यादिक्रत्वर्थपुरुषार्थयोरुभयोरनुष्ठानस्य दी-क्षितस्यावश्यकत्वेऽपि न हि क्रत्वर्थस्य पुरुषार्थत्वेन पुरुषार्थस्य क्रत्वर्थत्वेन नावश्यकता तथा वर्णाश्रमधर्मत्वेनावश्यकस्यापि वैष्णवधर्मत्वेनावश्यकता वैष्णवधर्मत्वेनावश्यकस्यापि मन्त्रजपादे-र्वर्णाश्रमधर्मत्वेन नावश्यकतेति भावः।

सज्ज० इति रामानुजीयाः, यत्तु गायत्रीजपस्यावश्यकताऽ-नावश्यकता वेति अस्मत्प्रश्नोत्तरेऽङ्कितैर्वैष्णवधर्मत्वेनावश्यकताऽ-धिकारिविशेषाणां वर्णाश्रमधर्मत्वेनावश्यकताभिप्रायकं तत्रेद-मुत्तरमित्यारभ्य मन्त्रजपादेरेवावश्यकत्वादित्यन्तकमुक्तं तदपि तुच्छतरम्। वैष्णवधर्मस्य वर्णाश्रमधर्मसमानाधिकरणत्वे वैष्ण-

तेषु त्रैवर्णिकेषु तदावश्यकत्वप्रसक्तौ वैष्णवधर्मत्वेनानावश्यकतोक्तिकथनस्य वैयर्थ्यापत्तेः । व्यधिकरणत्वे च वैष्णवानां सर्वेषां वर्णाश्रमवहिर्भूतत्वे श्रौतस्मार्तादिशास्त्रस्य वर्णाश्रमीयकर्तव्याकर्तव्यनिर्णयार्थकतायां सर्वैः शास्त्रकारैः प्रतिपादिततया तेषु शास्त्रविषयताया वक्तुमशक्यतया वैष्णवधर्मत्वेन सर्वेषां मन्त्रजपादेरावश्यकत्वस्य वक्तुमशक्यत्वात् इत्यलमिति तत्खण्डनमिति ।

व्या० अत्र यत्त्वित्यादिना तुच्छतरमित्यन्तेनास्मदुक्तस्यासमीचीनत्वं प्रतिज्ञायोपरितनसन्दर्भेण तदुपपादनमिव कृतमसत्तर्णैस्तच्छास्त्रमर्य्यादाज्ञानविजृम्भितम् । सर्वस्य जगतोऽज्ञानविजृम्भितत्ववादिनामपि न युक्तम् । वैष्णवधर्मस्य वर्णाश्रमधर्मसमानाधिकरणत्वेऽपि प्रयुक्तिविशेषकथनस्यावश्यकत्वात् अन्यथा तेषु गायत्रीजपादिषु वर्णाश्रमधर्मेषु वैष्णवत्वप्रयुक्तिभ्रमे तदनुष्ठानानर्हाणां स्त्रीशूद्रादीनां वैष्णवत्वासिद्धिप्रसङ्गात् । अत एव हि प्रयुक्तिलक्षणे पुरोडाशकपालेन तुषानपवपतीत्यादौ प्रोड़ाशकपालस्य पुरोड़ाशप्रयुक्तिरुत तुषापवापप्रयुक्तिर्वेति संशयेऽविशेषादुभयप्रयुक्तिरिति पूर्वपक्षे प्ररोडाशप्रयुक्तिः सिद्धान्तिता तुषापवापस्तु प्रतिपत्तिसंस्कार इति च प्रयुक्तिविशेषविचार उपपद्यते व्यधिकरणत्वे चेत्यसङ्गतम् । अत्र व्यधिकरणत्वं तदधिकरणावृत्तित्वं वा तदनधिकरणवृत्तित्वं वा विवक्षितं ? न प्रथमः प्रयुक्तिभेदेऽपि तयोः सामानाधिकरण्यस्योक्तत्वात् । न द्वितीयः वैष्णवानां सर्वेषां वर्णाश्रमवहिर्भूतत्वासिद्धेः । न हि घटत्वानधिकरणवृत्तिपृथिवीत्वमित्युक्तौ सर्वेषां घटानां

पृथिवीवहिर्भूतत्वसिद्धिः। अतः श्रौतस्मार्तेत्यादि तत्खण्डन-मित्यन्तम् असिद्धेन खप्ने वृश्चिकदंशेन कवाटे विषारोहण-वाक्यवदुपहास्यम्। प्रथमं वर्णाश्रमवहिर्भूतत्वमेव नास्तीत्युक्तम्। तत्सत्त्वेऽपि वैष्णवत्वेन सर्वेषां वैष्णवाधिकारिणां मन्त्रजपादे-रप्यावश्यकत्वं कथं वक्तुमशक्यं स्यात्।

प्रश्न० आवश्यकता चेत् तत्र भस्मधारणस्य रुद्राक्षमालया जपस्यावश्यकता वाऽनावश्यकता ?

दुर्ज० इति चतुर्थं वाक्यम्, तच्चोत्तरम्। आवश्यकतो-क्तैव भस्मधारणस्य नावश्यकता वर्णाश्रमधर्मरूपसाधारणप्रति-पादनपरे मनुस्मृतीत्यादौ धर्मशास्त्रे गायत्रीजपादिकाले भस्ममृदादिद्रव्यकतिलकादिधारणस्यानुक्तत्वात् वैष्णवधर्मप्रति-पादनपरे धर्मशास्त्रे सन्ध्यावन्दनादिकाले मृद्द्रव्यकोर्द्ध्वपुण्ड्रादि-धारणप्रतिपादकस्य वचनस्य बहुतरमुपलभ्यमानत्वात्। तच्च यत्किञ्चिद्वचनं षष्ठप्रधानप्रश्नोत्तरे लिखितमिति नेह लिख्यते। यत्तु विश्वामित्रकल्पादौ भस्मधारणगायत्रीजपकाले आवश्यक-मित्युक्तं तच्छैवाद्यधिकारिविषयम्। यच्च रुद्राक्षमालया जप-स्यावश्यकता न वेति तन्न रुद्राक्षमालया जपस्य सर्वथाऽसम्भव एव। तथा हि पितामह आह,—

"पर्वस्वेव जपेत् देवीं पवित्रां वेदमातरम्।
नाक्षमालादिभिर्नित्यम् इत्याह भगवान् मनुः॥"

इति। तथा भारद्वाजोऽपि,—

"मध्याङ्गुलेर्मध्यरेखां समारभ्य प्रदक्षिणम्।

मध्यमामूलपर्य्यन्तमङ्गुष्ठेन यथाक्रमम् ॥
सृष्टिद्वादशसङ्ख्या स्यादेकवारेण ते नव ।
वामहस्तेन सङ्ख्या ते शतमष्टोत्तरं स्मृतम् ॥
मध्यमाङ्गुलिमूलेन यत्पर्वद्वितयं भवेत् ।
तं वै मेरुं विजानीयात् जपेत् तन्नातिलङ्घयेत् ॥"

इति । तथा शंखः,—

"प्रारभ्यानामिकायास्तु मध्यमे पर्वणि क्रमात् ।
तर्जनीमूलपर्य्यन्तं जपेत् दशसु पर्वसु ॥
अनामिकामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेत् दशसु पर्वसु ॥"

इति । तथा,—

"अक्षमालादिभिर्नित्यं न जपेद् वेदमातरम् ।
पर्वभिर्गीयते वेदो तन्माता किमुत श्रुतिः ॥"

इति । क्वचित्, पर्वजपविकलस्य मालानुमतिः स्मर्य्यते ।
यथा भारद्वाजः,—

"प्रणवस्य व्याहृतीनां गायत्र्याश्च जपे भृशम् ।
श्रेष्ठा कुशाब्जमाला स्यात् समस्तानां जपस्रजाम् ॥"

इत्यापद्यपि कुशमालाब्जमालाव्यतिरिक्तमालाया निषेध एव । एवं च रुद्राक्षमालया गायत्रीजपस्यावश्यकत्वानावश्यकत्वविचारो वायसदन्ततैक्ष्ण्यपरीक्षातुल्यः । यदि विश्वामित्रपद्धतौ रुद्राक्षमालया जपस्य विधायकानीव कानिचिद्वचनानि दृश्यन्ते, तानि शैवाधिकारिविशेषे कुशाब्जमालाविधायकवचनवद् योज्यामीति ।

टी० उक्तैवेति पूर्वप्रश्नोत्तर इति शेषः। भस्मसृदादीत्यत्र मृच्छब्दो दृष्टान्तार्थः। तिलकादीत्यत्रादिशब्देन तुलसीमाला-धारणादिकं गृह्यते।

"यो विना चोर्द्धपुण्ड्रेण यत्कुर्य्यात् कर्म वैदिकम्।
निष्फलं तस्य तत्कर्म भस्मन्येवाहुतिर्यथा॥
ऊर्द्धपुण्ड्रविहीनस्तु सन्ध्याकर्म समाचरेत्।
तत्सर्वं राक्षसैर्नीतं नरकं स च गच्छति॥
नित्यं नैमित्तिकं काम्यं त्रिविधं श्रुतिचोदितम्।
ऊर्द्धपुण्ड्रविहीनस्य सर्वं तन्निष्फलं भवेत्॥"

इत्यादिकमभिप्रेत्य सन्ध्यावन्दनादिकाल इत्यादिकमुक्तम्। शिष्टं स्पष्टम्।

सञ्ज० इति रामानुजीयाः, यत्तु आवश्यकता चेत् तत्र भस्मधारणस्य रुद्राक्षमालया जपस्यावश्यकता नावश्यकता वेत्य-स्मत्प्रश्नोत्तरेऽङ्कितैस्तत्रोत्तरमित्यारभ्य योज्यानीत्यन्तकं रुद्राक्ष-मालया जपस्य भस्मधारणस्यावश्यकताभिप्रायकं भस्मधारण-रुद्राक्षमालाजपावबोधकवाक्यानां शैवाधिकारिविशेषविषयत्वं चोक्तम्, तदपि तुच्छतरम्।

"धार्य्यं भस्म त्रिसन्ध्यं तु गृहिणा जलसंयुतम्।
सर्वकालं भवेत् स्त्रीणां यतीनां जलवर्जितम्॥
वनस्थव्रतिकन्यानां दीक्षाहीननृणां तथा।
मध्याह्नात् प्राग्जलैर्युक्तं परतो जलवर्जितम्॥"

इति स्मृतिसंग्रहवाक्येन सर्वेषामविशेषतया भस्मधारणस्य,—

"त्रिंशद्भिः कृता माला धनदा जपकर्मणि, ।
सप्तविंशतिसङ्ख्यातैः कृता मुक्तिप्रदा भवेत् ॥"

इत्यादिना रुद्रयामलीयवचनेन,—

"अष्टोत्तरशतेनापि माला सर्वार्थसाधिका ।
रुद्राक्षमूलं यद् ब्रह्मा तन्नालं विष्णुरुच्यते ॥
तन्मुखं रुद्रमित्याहुर्बिन्दवः सर्वदेवताः ।"

इत्यादिस्कन्दपुराणीयवचनेन रुद्राक्षमालया जपस्याविशेषतयोक्तत्वात्। न च

पर्वस्वेव जपेत् देवीं पवित्रां वेदमातरम् ।
नाक्षमालादिभिर्नित्यमित्याह भगवान् मनुः ॥"

इति पितामहवाक्येन तेषां शैवाधिकारिविषयत्वादिति वाच्यम्, तस्य रुद्राक्षमालाभावविषयकत्वेनाप्युपपत्तेः। न चैवं नाक्षमालादिभिरिति वाक्यविशेषविरोध इति वाच्यम्, पर्वस्वेवेत्येवकारस्य नाक्षमालादिभिरित्येतदग्रे योजनेनैव शब्दस्याप्यर्थकत्वेन च विरोधाभावात्। पर्वसु जपप्रकारबोधकान्यपि वाक्यानि भारद्वाजशंखलिखितीयानि रुद्राक्षमालाभावपरतया पूर्वोक्तवचनानुरोधेन नेयानि। न च

"प्रणवस्य व्याहृतीनां गायत्र्याश्च जपे भृशम्।
श्रेष्ठा कुशाब्जमाला स्यात् समस्तानां जपस्रजाम् ॥"

इति पर्वजपविरुद्धस्य जपप्रकारविधानवैयर्थ्यमिति वाच्यम्, तस्याः श्रौतविषयकत्वात् स्वकल्पितभारद्वाजसंहितास्थत्वेनाप्रामाणिकत्वाच्च कामनाविशेषविषयतयाप्युपपत्तेश्च। तस्मात् चैव-

र्णिकोचितधर्मव्यवस्थापकतया प्रवृत्तानां शास्त्राणामाधुनिकशटकोपप्रभृतिप्रवर्तितैकजात्युचितमार्गस्य त्रैवर्णिकेषु प्रवर्तनयान्यार्थपरतयोन्नयनमसङ्गतमित्यलमिति तत्खण्डनमिति।

व्या० अत्र यत्त्वित्यादिना तदपि तुच्छतरमित्यन्तेनास्मदुक्तं साभिप्रायमनूद्य तस्य तुच्छत्वं प्रतिज्ञाय तदुपपादनाय धार्य्यं भस्मेत्यादिकं यदुक्तमसल्लक्षणैस्तदसङ्गतम्।

"रुद्राक्षधारिणं विप्रं सदा भस्मानुलेपनम्।
सकुलं तं त्यजेन्नित्यं सर्वधर्मवहिष्कृतम्॥"

इति ब्रह्मरात्रवचनेन,—

"न धारयेत् जटाभारं भस्म चैव न धारयेत्।
वाह्यलिङ्गानि चिह्नानि संत्यजेद् यावदायुषम्॥"

इति विष्वक्सेनसंहितावचनेन च भस्मरुद्राक्षमालाधारणस्य सर्वदा ब्राह्मणस्य निषिद्धतया वचनद्वयविरोधोऽस्माभिः परिहृतः न कस्यापि वचनस्य कल्पितत्वं ब्रुमो वयम्। यदि भवादृशः कश्चित् भस्मादिधारणबोधकानां भवादृशकल्पितत्वं ब्रूयात् तदा परस्परसदृशानां भवतां तस्य च मुष्टीमुष्टि केशाकेशि युद्धमन्तरा न काचिद् गतिर्भविष्यति। पश्चात् तस्य राजराड्पीड़ा कामं भवतु। अतो भस्मरुद्राक्षमालावश्यकत्वबोधकवचनानां तन्निषेधकवचनानां च शैववैष्णवविषयकत्वेनैव व्यवस्था कर्तव्या। यत्तु न चेत्यादि शङ्काया उत्तरम् तादृशवचनस्य रुद्राक्षमालाभावविषयकत्वेनोपपत्तिकल्पनेनोक्तम्, तन्मन्दम्।

"अक्षमालादिभिर्नित्यं न जपेत् वेदमातरम्।

पर्वभिर्गीयते वेदो तन्माता किमुत श्रुतिः ॥"

इति वचनेनाक्षमालादिना जपस्य कण्ठतो निषिद्धतया तत्र चोपपत्तेरप्युत्तरार्द्धे प्रोक्तत्वाच्चार्थतः शब्दतश्च तत्समानस्य पर्वस्वेवेति रुद्राक्षमालाभावविषयकत्वकल्पनासम्भवात्, एवकारस्य भिन्नक्रमेण योजनायामपि न भवदभिमतसिद्धिः रुद्राक्षमालया गायत्रीजपस्यावश्यकत्वालाभात्। यत्तु प्रणवस्येत्यादिवचनस्य श्रौतविषयकत्वेनोक्ता व्यवस्थेति तदपि तुच्छम्। कुत्र श्रौते गायत्रीजपो विहितः, तत्र रुद्राक्षमालाया असम्भवः। कथं चेन कुशाक्षमालाया अनुमतिः तदनुक्तेः। यत्तु समाधानान्तरं स्वकल्पितेत्यादिना तदतिसमीचीनम्। अस्माभिः कृतानि सर्वाणि उत्तराणि विलिख्य तदुपर्य्येवं लेखनीयं भवदुक्तानां सर्वेषां प्रमाणवचनानां कल्पिततयाऽस्मदुक्तवचनानां सर्वेषां साक्षाद्भवेनैव विना पुस्तकावलोकनमस्मान् प्रत्युक्ततयाऽस्मदुक्तविपर्य्ययाभिधायिनां श्रीराजैः शिरश्छेदपर्य्यन्तं दण्डस्य कर्तव्यतया च भवल्लिखितानां सर्वेषां खण्डनं जातम्। गच्छन्तु भवन्तो दिशो दशेति तावतैव भवतां जय उद्घोषणीय इति किमेतावान् मषीपत्रव्ययः कृतः। तत्रैव यत्तु कामनाविशेषविषयतयेति समाधानं कृतं, तदतिमनोज्ञम्।

"त्रिंशदक्षैः कृता माला धनदा जपकर्मणि।
सप्तविंशतिसङ्ख्यातैरक्षैः पुष्टिप्रदा सदा॥
पञ्चविंशतिसङ्ख्यातैः कृता मुक्तिप्रदा——।"

इत्यादिवचनानां निष्कामविषयकत्वं किञ्चित्फलं विना नित्य-

वत् श्रुतानामस्मदुक्तानां वचनानां कामनाविशेषविषयकत्वमिति। यत्तु तस्मादित्यादिकं चासङ्कन्निरस्तनिर्लज्जस्य स्वबाचालत्वप्रशंसातुल्यम्।

प्रश्न० भगवत्पूजनसमये कानि कानि पात्राणि शस्तानीति।

दुर्ज० इति पञ्चमं वाक्यम्, तत्रेदमुत्तरम्। वैखानसपञ्चरात्रादिग्रन्थेषु भगवत्पूजनप्रकरणे आश्रमानुरोधेन विभवानुरोधेन च यानि यानि पात्राणि भगवत्पूजनार्हाण्युक्तानि तानि तानि शस्तानीति।

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, यत्तु भगवत्पूजनसमये कानि कानि पात्राणि शस्तानीत्यस्मत्प्रश्नोत्तरेऽङ्कितैस्तत्रेदमुत्तरमित्यारभ्य शस्तानीत्यन्तकमुक्तं तदपि तुच्छतरम्।

"धर्मादिविषयज्ञाने त्वागमाः पुरुषोदिताः।
पाञ्चरात्रादयः सर्वे न प्रमाणमिति स्थितिः।"

इति पराशरपुराणीय-दशमाध्यायस्थवचनेन पाञ्चरात्रागमाप्रामाण्यस्य,—

"वामपाशुपतादीनामश्रौतानां परिग्रहः।
पाञ्चरात्रागमस्यापि ज्ञानानुत्पत्तिकारणम्॥"

इति मुक्तिखण्डनीय-सप्ताध्यायीयवचनेन निःश्रेयससाधनीभूतज्ञानप्रतिबन्धकत्वस्य च

"या खण्डिनो विकर्मस्थान् धर्माचार्य्यांस्तथैव च।

पाञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्चयेत्॥"

इति कूर्मपुराणीयोत्तरभागपञ्चदशाध्यायस्थवचनेन निषिद्ध-त्वस्य च यान्येतानि त्रयीविद्भिर्न परिगृहीतानि किञ्चिन्मिश्र-धर्मकञ्चुकच्छायापतितानि लोकोपसंग्रहलाभपूजाख्यातिप्रयो-जनपराणि त्रयीविपरीतासंबद्धदृष्टशोभादिप्रत्यक्षानुमानोप-मानार्थापत्तिप्राययुक्तिमूलोपनिबद्धानि साङ्ख्ययोगपाञ्चरात्र-पाशुपतशाक्यनिर्ग्रन्थपरिगृहीतधर्माधर्मनिबन्धनानि विरोधे त्वनपेक्षं स्यात्, असति ह्यनुमानं हेतुदर्शनाच्चेति जैमिनीय-सूत्रद्वयव्याख्याण-भट्टपादीयवचनकदम्बेन वेदत्रयीवाह्यत्वस्य पाञ्चरात्रादीनामवगत्या तदुक्तपूजापात्राणां प्राशस्त्यस्य वक्तुम-शक्यत्वात्। भारतीयपाञ्चरात्रागमस्य लुप्यमानताया उपलभ्य-मानस्य च भवादृक् कल्पितत्वस्य च त्रैवर्णिकेतरपरत्वस्य वा प्रागेवोपपादितत्वाच्चेत्यलमिति तत्खण्डनमिति।

व्या॰ यत्तु भगवत्पूजनसमय इत्यादिना तत्तुच्छतरमि-त्यन्तेनास्मदुक्तानुवादपूर्वकमस्मदुक्तस्यासमीचीनत्वं प्रतिज्ञाय धर्मादिविषयेत्यादिना तदुपपादकतया किञ्चिदुक्तं तदति-साहसकृतम् तथा हि "धर्मादिविषयज्ञाने" इत्यादिपराशर-पुराणीयवचनं "वामपाशुपतादीनाम्" इत्यादिमुक्तिखण्डीय-वचनम् "पाषण्डिनो विकर्मस्थान्" इत्यादिकूर्मपुराणीय-वचनम् "यान्येतानि" इत्यादिभट्टवचनकदम्बश्च पञ्चरात्रा-गमस्याप्रामाण्यस्य निःश्रेयसाधनज्ञानप्रतिबन्धकत्वस्य निषिद्ध-त्वस्य त्रयीवाह्यत्वस्य च न बोधनायालं तेषाम्,—

"वेदानध्यापयामास महाभारतपञ्चमान्।
भारतः पञ्चमो वेदः———————"

इत्यादिना पञ्चमवेदत्वेन श्रुतेन भारतेन प्रतिस्पर्द्धितुमशक्तत्वात्। श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मे नारायणीये एकचत्वारिंशदधिकशततमाध्याये,—

"एवं स भगवान् देवो विश्वमूर्त्तिधरोऽव्ययः।
एतावदुक्त्वा वचनं तत्रैवान्तर्दधे पुनः॥
नारदोऽपि महातेजाः प्राप्यानुग्रहमीप्सितम्।
नरनारायणौ द्रष्टुं वदर्य्याश्रममाद्रवत्॥
इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतं तेन पञ्चरात्रानुशब्दितम्॥
नारायणमुखोद्गीतं नारदोऽश्रावयत् पुनः।
ब्रह्मणः सदने तात! यथादृष्टं यथाश्रुतम्॥"

इत्यादिना नारायणवक्तृकत्वचतुर्वेदसमन्वितत्वब्रह्मसदनप्रवृत्तेः पञ्चरात्रशब्दितस्य प्रामाण्यं व्यवस्थापितम्। तत्रैव,—

"देवानां तु सकाशाद्वै ततः श्रुत्वासितो द्विजः।
श्रावयामास राजेन्द्र! पितॄणां मुनिसत्तमः॥
मम चापि पिता तत्तत्कथयामास शान्तनुः।
ततो मयापि श्रुत्वा च कीर्तितं तव भारत॥"

इति भीष्मवचनेन,—

"श्रुत्वैतदाख्यानवरं धर्मराड् जनमेजय!।
भ्रातरश्चापि ते सर्वे नारायणपरा भवन्॥"

इति वैशम्पायनवचनेन,—

“एतत् ते सर्वमाख्यातं नारदोक्तं मयेरितम् ।
पारम्पर्य्यागतं ह्येतत् पित्रा मे कथितं मया ॥” इति ।
“एतत् ते सर्वमाख्यातं वैशम्पायनकीर्तितम् ।
जनमेजयेन तत् श्रुत्वा कृतं सम्यक् यथाविधि ॥”

इति च भीष्मसूतवचनाभ्यां जनमेजयपर्य्यन्तमेतच्छास्त्रप्रवृत्तेरनुष्ठानपर्य्यन्तायाश्चोक्तत्वात् पाञ्चरात्रप्रचार उक्तः । एवं तत्रैव पञ्चाशदधिकत्रिशताध्याये जनमेजय उवाच,—

“अहो ह्येकान्तिना सर्वान् प्रीणाति भगवान् हरिः ।
विधिप्रयुक्तां पूजां च गृह्णाति भगवान् स्वयम् ॥
ये तु दग्धेन्धनालोके पुण्यपापविवर्जिताः ।
तेषां त्वयाभिनिर्दिष्टा पारम्पर्य्यागता गतिः ॥
चतुर्थ्यां चैव ते गत्यां गच्छन्ति परमं पदम् ।
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः ॥
अगत्वा गतयस्तिस्रो निगच्छन्त्यव्ययं हरिम् ।
सहोपनिषदान् वेदान् ये विप्राः सम्यगास्थिताः ॥
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ।
तेभ्यो विशिष्टं जानामि गतिमेकान्तिनां नृणाम् ॥
केनैष धर्मः कथितो देवेन ऋषिणापि वा ।
एकान्तिनां च का चर्य्या कदाचोत्पादिता विभो ! ॥
एतन्मे संशयं छिन्दि परं कौतूहलं हि मे ।”

इति जनमेजयवचनेन,—

"अगतिश्च गतिश्चैव पूर्वं ते कथिता मया।
गहनो ह्येष धर्मो वै दुर्विज्ञेयोऽकृतात्मभिः॥
सम्मितः सामवेदेन पुरैवादियुगे कृतः।
धार्य्यते स्वयमीशेन स्वयं नारायणेन च॥"

इत्यारभ्य,—

"एष एकान्तिधर्मस्ते कीर्तितो नृपसत्तम!।
मया गुरुप्रसादेन दुर्विज्ञेयोऽकृतात्मभिः॥
एकान्तिनो हि पुरुषा दुर्लभा बहवो नृप!।
यद्येकान्तिभिराकीर्णं जगत् स्यात् कुरुनन्दन!॥
अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः।
भवेत् कृतयुगप्राप्तिराशीः कर्मविवर्जिताः॥"

इति वैशम्पायनवचनेन च निःश्रेयससाधनीभूतधर्मेष्वत्युत्तमत्वस्य मोक्षाऽव्यभिचारिज्ञानजनकत्वस्यैतद्धर्मानुष्ठात्रेकान्तिजनदौर्लभ्यस्य च कथनेन च ज्ञानजनकत्वं चोक्तम्।

"एवं बहुविधं धर्मं प्रतिबुद्धैर्निषेवितम्।
न कुर्वन्ति कथं विप्रा अन्ये नानाव्रते स्थिताः॥"

इति जनमेजयेन पृष्टस्य वैशम्पायनस्य,—

"तिस्रः प्रकृतयो राजन्! देहबन्धेषु निर्मिताः।
सात्विकी राजसी चैव तामसी चैव भारत॥
देहबन्धेषु पुरुषः श्रेष्ठः कुरुकुलोद्वह।
सात्विकः पुरुषव्याघ्र! भवेन्मोक्षाय निश्चितः॥
अत्रापि स विजानाति पुरुषं ब्रह्मवित्तमम्।

त्वमेव महाभारतादिसंप्रतिपन्नम्। तच हेतुश्च जायमानं हि पुरुषमित्यादिनोक्तमेव तत्र कूर्मपुराणादितामसपुराणेषु पञ्चरात्रनिन्दा युक्तैव। पद्मपुराणे,—

"शृणु देवि! प्रवक्ष्यामि यद्गुह्यं परमाद्भुतम्।
न वक्तव्यं त्वया किञ्चिज्जनेषु कथितं मया॥"

इत्यादिना स्वस्य परमवैदिकधर्मनिष्ठानामतएव देवैरजेयानां नमुच्यादीनां जयार्थं शरणागतैर्देवैः प्रार्थितस्य भगवतो वचनेन,—

त्वं हि रुद्र महाबाहो! मोहनार्थं सुरद्विषाम्।
पाषण्डाचरणं धर्मं कुरुष्व सुरसत्तम!॥
तामसानि पुराणानि कथयस्व च तान् प्रति।
मोहनानि च शास्त्राणि कुरुष्व च महामते!॥
तथा पाशुपतं शास्त्रं त्वमेव कुरु सुव्रत।
कैलासशैवपाषण्ड-महाशैवादिभेदतः॥"

इत्यादिना तामसपुराणप्रवर्तनं रुद्रेण पार्वतीं प्रत्युक्तम्। तादृशतामसपुराणादौ परमवैदिकधर्म-तत्प्रमाणनिन्दाऽकरणे तत्प्रवृत्तिप्रयोजनासिद्धेः, तस्मात् पाञ्चरात्रवैखानसाद्युक्तानि पूजापात्राणि शस्तानीति सत्यमुक्तम्। यत्तु भारतीयपञ्चरात्रागमस्येत्यादिकमुक्तम्, तन्महामोहकृतम्। तत्र स एवंवादी प्रष्टव्यः पराशरपुराणकूर्मपुराणादिषु अप्रमाणत्वेन मोक्षसाधनप्रतिबन्धकत्वेन निषिद्धत्वेन वेदबाह्यत्वेन चोक्तं पञ्चरात्रं किं भारतीयमुतास्मत्कल्पितमिति। यदि तत्र प्रथमपक्षं ब्रूयात्,

तदा पञ्चमवेदतया प्रसिद्धेन भारतेन मोक्षसाधनीभूतपरमधर्मप्रतिपादकतया पञ्चरात्रं बोधयतां तामसपुराणानां तदनुगुणवचसां च प्रतिस्पर्द्धानर्हतया निरसनीयः नारदीयपञ्चरात्रस्य कृत्स्नस्योपरिचरानन्तरमेव लुप्ततया तस्य कथमिदानीमुपलब्धिरिति चेन्न जनमेजयपर्य्यन्तं नारदद्वारा तत्प्रवृत्तेर्भारत एव बहुशः प्रतिपादिततयोपरिचरानन्तरं सम्प्रदायविशेषस्य व्यवस्थित-तदनन्तरभाविलोपस्य वा वक्तव्यतयेदानीं तदुपलब्धौ विरोधाभावात्। अतएव न च कर्तुः करणमित्यादिसूत्रव्याख्यानावसरे शङ्कराचार्य्यप्रभृतिभिर्भाष्यकारैः पञ्चरात्रे इदानीमनुभूयमानवचनोपन्यासश्च सङ्गच्छते, अन्यथा श्रीवेदव्यासैरपि उपरिचरमरणानन्तरं जातैस्तदधिकरणरचनापि न कर्तव्या तन्मूलस्य प्रागेव नष्टत्वात्, न च वेदान्तसूत्राणां सर्वकालोपजीव्यत्वात् तदावश्यकमिति वाच्यम्, तत्पूर्वकाले विना मीमांसां वेदार्थानां निर्णीतत्वात् अनन्तरकाले पञ्चरात्रस्य लुप्तत्वाच्च तद्वैयर्थ्यस्य दुर्वारत्वात्। यदि द्वितीयं पक्षं ब्रूयात्, तदा भवदुक्ततत्प्रश्नोत्तराणि अस्मदीयानि अप्रमाणमिति कुतो न दूषितानि अन्यानि वादाद्वाद्युक्तानि मतानि कुतो न खण्डितानि एवमर्वाचीनप्रवर्तितं पञ्चरात्रशास्त्रं भट्टपादेन तत्पूर्वकालवर्तिना कथमवगतम्। तस्य सर्वज्ञत्वादिति चेदीश्वरव्यवस्थापनादिकं कुतो न कृतम्। अनुपयोगादिति चेत्? को वोपयोगः पञ्चरात्रादिखण्डनेनातो भवदुपन्यस्तवाक्यकदम्बो भट्टपादीयो वा न स्यात्, स वानीश्वरत्वादिवाद

वह्नौ निक्षिप्य बहुधाध्मायमानो द्रवीभूय स्वस्वरूपं त्यजन्ति हीति ।

टी० परमैकान्तिधर्मप्रतिपादकेष्विति "अवैष्णवानां दृष्टं च भोजनं वैष्णवः त्यजेत्" इत्यादिकमभिप्रेत्योक्तम् ।

भञ्ज० इति रामानुजीयाः, यत्तु भवत्सम्प्रदायरहित-विद्वत्तादिगुणयुक्तब्राह्मणदृष्टमन्नं भोज्यमभोज्यं वेत्यस्मत्प्रश्नोत्तरेऽ-ङ्कितैस्तत्रेदमुत्तरमित्यारभ्य त्यजति हीत्यन्तकमस्मत्सम्प्रदायिनां पारमैकान्त्यधर्मज्ञानानुष्ठानादिसम्पादनार्थमितरैः सह भोजना-दीनामकर्तव्यत्वाभिप्रायकमुक्तं तदसङ्गतम् । सम्प्रदायव्यतिरिक्तैः सह भोजनादीनां स्वस्य पारमैकान्त्यधर्मज्ञानानुष्ठानादिप्रति-बन्धकत्वस्य स्वस्य चित्तविक्षेपसम्पादकतया दृष्टान्तानुरोधेन वक्तव्यत्वे तत्त्वस्य स्वस्य स्वसम्प्रदायसाहित्यविशिष्टस्वकर्तृकभोज-नादीनां निरुक्तानुष्ठानसमानकालीनत्वेन निरुक्तानुष्ठानादि-प्रतिबन्धकत्वमुत तद्भिन्नकालीनत्वेन ? नाद्यः स्वकर्तृकभोजना-दीनामपि स्वचित्तविक्षेपसम्पादकत्वस्य कथमप्यवर्जनीयतया स्वीयनिरुक्तानुष्ठानादिकं प्रति प्रतिबन्धकत्वस्य निश्चये स्वाति-रिक्तसाहित्यविशिष्टभोजनादीनां निरुक्तदोषेण परित्यागस्या-नौचित्यापत्तेः । नान्त्यो निरुक्तानुष्ठानादीनां सदैवानुत्पत्त्यापत्ते-र्भोजनादीनां सर्वत्रैव प्राणिषु कदाचिद्विद्यमानत्वात् । न च स्वसम्प्रदायातिरिक्तैः पण्डितैरपण्डितैर्वा ब्राह्मणैरब्राह्मणैर्वा सहासनशय्याभोजनादिव्यवहारो नास्माभिः क्रियते, परमै-कान्तिकधर्मप्रतिपादकस्मृत्यादिप्रमाणादिति वाच्यम्, तादृश-

स्मृतीनां मणिमन्त्रादिन्यायेन निरुक्तार्थप्रतिपादकत्वे दृष्टान्त-कथनस्य वैयर्थ्यापत्तेः। युक्तानिरुक्तार्थप्रतिपादकत्वे स्वेतर-कर्तृकभोजनादीनामिव स्वकर्तृकभोजनादीनामपि निरुक्तानु-ष्ठानप्रतिबन्धकत्वस्य दुर्वारत्वापत्तेरित्यलमिति तत्खण्डनमिति।

व्या॰ अत्र यत्त्वित्यादिना तत्खण्डनमित्यन्तेनासम्बद्धैरुक्तं तदसङ्गतम्। अत्र निरुक्तास्मत्सम्प्रदायिव्यतिरिक्तैः सह भोजन-शय्यासनादिव्यापारे क्रियमाणे तत्कालेऽस्मत्परमैकान्तिधर्म-विरुद्धं किञ्चिद्वदेयुराचरेयुश्चेत् तदा तच्छ्रवणेन दर्शनेन कदा-चिन्मनसस्तादृशधर्मनिष्णातस्य शैथिल्यं सम्भवेत्, क्रमशस्तादृश-धर्मानुष्ठानवैमुख्यञ्च सम्भवेत्। अतस्तादृशव्यापारः परमैकान्ति-धर्मनिष्ठैः परित्याज्य इति निरुक्तस्मृतीनां तदनुगुणानुष्ठानवतां च तात्पर्यमित्यस्माभिरुक्तं न तु तादृशानुष्ठानप्रतिबन्धकत्वं मणिमन्त्रादिन्यायेन बोधकत्वं तादृशप्रतिबन्धकत्वबोधकत्वं वा? अतो न स्वसम्प्रदाय्यतिरिक्तैरित्यादिकमस्थानविजृम्भणम्। किं च स्वसम्प्रदायिव्यतिरिक्तैः सह भोजनादीनां तादृशधर्म-ज्ञानानुष्ठानप्रतिबन्धकत्वे स्वसम्प्रदायिभिः सह भोजनादीनां तादृशधर्मज्ञानानुष्ठानप्रतिबन्धकत्वं कथमापद्येत। येन स्वस्य स्वैः सार्द्धमपि भोजनापत्तिः। न ह्यस्माभिः स्वव्यतिरिक्तैः सह भोजनादीनां तत्प्रतिबन्धकत्वमुक्तं, येन भवदुक्तं स्यात्, न तु स्वसम्प्रदायिव्यतिरिक्ताः स्वातिरिक्ता एवेति तदप्यर्थादायात-मिति चेन्न तथा सतीदं दूषणं जातिः एतेन किं चेत्यादिक-मपि निरस्तम्। स्वेतरसाहित्यविशिष्टस्वकर्तृकभोजनादीनां

चित्तविक्षेपसम्पादकत्वस्य तद्द्वारा निरुक्तप्रतिबन्धकत्वस्यैवानङ्गीकारेण तत्र निरुक्तानुष्ठानसमानकालीनत्व-तद्भिन्नकालीनत्वविकल्पस्य गगनतलचित्रलेखायमानत्वात्; न च स्वसम्प्रदायिव्यतिरिक्तैरित्यादिग्रन्थस्य समाधानमपि न सत्, मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वस्य प्रामाणिकत्वेऽपि शब्दस्यार्थप्रत्यायकत्वे मणिमन्त्रादिन्यायस्याप्रामाणिकत्वात् विरोध्यनवगाहिनः प्रतिबन्धकत्वे मण्यादेरिव प्रकृते तादृशदृष्टान्तस्योपपादनेऽपि दोषाभावात् इत्यादिकं दूषितमेवेति ।

प्रश्न० भवत्सम्प्रदायस्यसवर्णदृष्टमन्नं भुज्यते न वा ?

दुर्ग० इत्यष्टमं वाक्यम्, तत्रेदमुत्तरम् । अस्मत्सम्प्रदायस्य-पुरुषविशेषदृष्टान्नभोजनस्य शास्त्रे निषेधो नोपलभ्यते यद्यपि तथापि न भुज्यते, पूर्वाचार्य्यैरभिसन्धिविशेषेण तस्य परित्यक्तत्वात् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यादित्यादिना तथा तेषु वर्तेथा इत्यन्तेन वेदमनूच्याचार्य्योऽन्तेवासिनमनुशास्तीत्यनुशासनप्रकरणस्थेन तैत्तिरीयश्रुतिवाक्येन पूर्वाचार्य्यानुष्ठिताचारस्य तदनुयायिनामावश्यकत्वाऽभिधानात् । तथा च स्मृतिः धर्मज्ञसमयः प्रमाणं वेदाश्च

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चापि साधूनामात्मनस्तुष्टिरेव च ॥"

इत्यादिका पूर्वाचार्य्याणामभिसन्धिश्चायम् । न हि वाह्यचिह्नमात्रेण पारमैकान्त्यधर्मनिष्ठा ज्ञातुं शक्यते, कदाचिद्दृत्त्यर्थं भयादिनावान्तरनिष्ठाशून्यानामपि वाह्यचिह्नधारणसम्भवात् ।

तैश्च निष्ठापूर्णैः सल्लापसहवासादिकमुक्तधर्मशैथिल्यभिया न कर्तव्यमेव सम्यक् परीक्षितान्तरनिष्ठैः सहवासादिकरणे न कोऽपि विरोधस्तथापि सजातीयविरोधादिकं बहुतरक्लेशमूलं सम्भवेदतो गार्हस्थ्यादिव्यवहारार्थमवश्यापेक्षित-सजातीयव्यतिरिक्तैः सह भोजनादिकं परित्याज्यमिति तथा क्वचित्स्थले भगवत्सन्निधाने भुज्यत एव तद् दृष्टमपीति ।

टी० स्पष्टोऽर्थः ।

सज्ञ० इति रामानुजीयाः, यत्तु भवत्सम्प्रदायस्यसर्ववर्णदृष्टमन्नं भुज्यते न वेत्यस्मत्प्रश्नोत्तरेऽङ्कितैः, तत्रेदमुत्तरमित्यारभ्य तद्दृष्टमपीत्यन्तकं श्रौतस्मार्तनिषेधाभावेऽपि स्वाचार्य्याणामेवंविधव्यवहाराभावादेव न भुज्यत इत्यभिप्रायकमुक्तम्, तदपि तुच्छतरम् । अष्टमप्रधानप्रश्नावलम्बि-सप्तमवाक्योत्तरस्थेनास्मत्सम्प्रदायैकान्तिनामस्मत्सम्प्रदाय-विरुद्ध-वचनाचारयुक्तैः पण्डितैरपण्डितैर्वा ब्राह्मणैरब्राह्मणैर्वा सहासनशय्याभोजनादिव्यवहाराणामकर्तव्यत्वमित्यनेन स्वस्य स्वसम्प्रदायस्यब्राह्मणाब्राह्मणसाहित्यविशिष्टभोजनकर्तव्यत्वरूपस्पष्टतरप्रतीयमानार्थकेन स्वोक्तेन सह विरोधात् स्वाचार्य्यव्यवहारमात्रेण कर्तव्याकर्तव्यनिश्चये तन्निर्णायकश्रुतिस्मृतीतिहासपुराणवाक्यानां वैयर्थ्यापत्तेश्च । न च पूर्वपूर्वाचार्य्यव्यवहारनिर्णायकतया नवैयर्थ्यमिति वाच्यम्, तथा सति स्वसम्प्रदायस्यसर्ववर्णदृष्टमन्नं न भोक्तव्यं स्वस्य । कुत्रचिद् हरिमन्दिरादौ भोक्तव्यमित्याकारकपूर्वपूर्वाचार्य्यव्यवहारनिर्णायकवचनस्योपन्यासमन्तरेणास्मत्प्रश्नो-

तरं कर्त्तुमशक्यत्वात् । न च तादृशव्यवहारनिर्णायकवचनमप्यस्तीति वाच्यम्, तद्वचनस्यार्षत्वेऽस्मत्सम्प्रदायस्य पुरुषविशेषदृष्टान्नभोजनस्य शास्त्रे निषेधो नोपलभ्यत इति स्वकधर्मविरोधापत्तेः अनार्षत्वे तस्याप्रामाण्यशङ्कानास्कन्दिततया निर्णायकत्वस्य वक्तुमशक्यत्वात् । न च यदि पूर्वपूर्वव्यवहारनिर्णयार्थं तत्तद्वचनापेक्षत्वे अथ यदि ते कर्मविचिकित्सेत्यादिश्रुतेः का गतिरिति वाच्यम्, यत्र हि कार्य्यद्वयं शास्त्रबोधितं षोड़शिग्रहणाग्रहणादिरूपं तत्रैकेनैकदोभयं कर्त्तुमशक्यतयाऽन्यतरस्मिन् बलवत्तरप्रमाणाभावेन कुलपारम्पर्य्यागतानुष्ठानाभावस्यापि कदाचिदापत्तिः स्यात् । अतस्तन्निरसनाय परम्परागत-श्रौतस्मार्तमार्गावलम्बित्वस्याभ्युदयजनकत्वबोधकत्वात् । न च लोकनिन्दायाः स्वसम्प्रदायस्थसर्ववर्णदृष्टमन्नमस्माकं भोज्यमपि न भुज्यत इति वाच्यम्, शूद्राचार्य्यकरणेनैकजात्युचितचक्राङ्कनादीनां लोभमोहादिनाऽनभिज्ञत्रैवर्णिकेषु प्रवृत्तिकरणेन च लोकनिन्दाया भवद्भिः प्रथमत एव परित्यक्तत्वादित्यलं मिश्रपरामर्शैः" इति तत्खण्डनमिति ।

व्या० अत्र यत्तु भवत्सम्प्रदायस्येत्यादिना तदपि तुच्छतरमिति अस्मदुक्तस्य तुच्छत्वं प्रतिज्ञाय तदुपपादकतया अष्टमप्रधानप्रश्नेत्यादिकमुक्तं तन्मन्दम् । अस्मत्सम्प्रदायिव्यतिरिक्तैर्ब्राह्मणैरब्राह्मणैः पण्डितैरपण्डितैर्वा सह भोजनादिकं न कर्तव्यमित्यनेनास्मत्सम्प्रदायिभिः ब्राह्मणैरब्राह्मणैश्च सह भोजनादिकं कर्त्तव्यमिति कथं प्रतीयेत तथा सति "तस्माद् ब्राह्मणाय

नावगुरेत योऽवगुरेत शतेन यातयात्” इति वचनेन ब्राह्मणा-यावगोरणं न कर्त्तव्यमिति वदता क्षत्रियादिभ्योऽवगोरणं कर्त्तव्यमिति स्पष्टतरप्रतीत्यापत्तिः। न तादृशप्रतीतिः कस्या-पीष्टा। किं च यत्र श्रुतिस्मृत्यादिकं प्रमाणं नास्ति। तत्र स्वीयशिष्टाचारमात्रं शास्त्राविरुद्धे प्रमाणमुक्तम्। भवतामपि शास्त्राविरुद्ध-विवाहादिकालीन-तैलाभ्यङ्गादिव्यवहार-घटनया सम्प्रदायवैविध्यं वदतामिष्टमेव अस्मदुत्तरनिराकरणाभिनिवे-शेनेदानीं विस्मृतम्। एवं सति कथं श्रुतिस्मृतिवैयर्थ्यम्। अतएव न चेत्यादिशङ्कासमाधानं च निरस्तम्। श्रुतिस्मृत्यादि-प्रमाणानाम् उक्तप्रकारेण प्रामाण्यस्य केनाप्यनङ्गीकारात् अन्य-थाऽप्रामाण्यस्य वैयर्थ्याभिधस्याभावात्। अतएव तादृशवचनस्या-नपेक्षितत्वात् अप्रश्नप्रश्नोत्तरं कर्त्तुमशक्यत्वादिति अनन्वितमिव प्रतिभाति, तथापि तात्पर्य्यमवगतमेव। अतो न चेत्यादिशङ्का तद्वचनस्येत्यादिना विकल्पपूर्व्वकं तत्खण्डनं चासङ्गतम्। किं चानार्षत्वे कथमप्रामाण्यज्ञानानां स्कन्दिततया निर्णायकत्वस्य वक्तुमशक्यत्वम्। प्रामाण्यस्य स्वतस्त्वनये ज्ञानसामग्रीमात्रस्य प्रमाणजनकत्वस्यावश्यकत्वात् तस्य परतस्त्वनयेऽपि प्रामाण्याप्रा-माण्यौदासीन्येन ज्ञानजनकत्वाङ्गीकारात्। किं च न चेत्यादि-पूर्व्वपक्षसमाधानमप्यसत् अतिरात्रे षोडशिनं गृह्णाति नाति-रात्रे षोडशिनं गृह्णातीति वचनयोर्द्व्यापचार-तत्प्राप्तिस्थल-विषयकतया तान्त्रिकैर्व्यवस्थापिततया एकत्र तयोः प्राप्त्यभावे-नानुष्ठानाभावस्यैवाप्रसक्तेः। तादृशार्थनिर्णायकत्वेन यदि ते कर्म-

र्विचिकित्सेत्यादिश्रुतिसार्थक्याभिधानस्य वक्तुमशक्यत्वात् । यस्य कुले केनापि अतिरात्रानुष्ठानं न कृतं, तत्र कथं व्यवस्थेत्यप्राप्तेः । न च केनचिद्वैदिकेनानुष्ठानं कृतमेवेति तदेव कुलपरम्परागतमनुष्ठानमिति वाच्यम्, उभयोरपि वैदिकैरेवाऽनुष्ठिततया कुलपरम्परागतानुष्ठानेनापि तद्व्यवस्थाऽसम्भवात् । न च लोकनिन्दाया इत्यादिकमपि केवलेर्ष्यामूलकमसत्-शूद्राचार्य्याकरणात् सर्ववर्णोचितानां परमैकान्तिधर्माणां जायमानं हि पुरुषमित्यादिमहाभारतादिवचनेन प्रतिपादितकारणाभावेन नानामतनिष्ठब्राह्मणादिभिरननुष्ठितानां यावदात्मभावि-नरकपातोपयुक्तपातक-विशेषवज्जीवविशेष-निन्दितानां संसारनिवृत्त्येकप्रयोजनानां काम-क्रोध-लोभ-मोह-विधुरमहात्मभिरेवानुष्ठापनीयानां चक्राद्यङ्कनानां सज्जनमुमुक्षुषु प्रवर्तनेन द्वेषेण परावेशेन वा कृताया निन्दाया अकिञ्चित्करत्वात् दुर्जनकृतनिन्दायाः समनिन्दास्तुतिभिः परित्यक्तव्यत्वाच्चेत्यलं ग्रामणीविवादेनेति ।

दुर्ज० यत्तु एतत्प्रश्नपत्रादन्यत्र लिखितमिति श्रुतं रामानुजीयमतमत्यन्तमप्रमाणम् । अर्थसम्पादनार्थं कल्पितं रामानुजीयास्त्वेतादृशमतं प्रवर्त्य व्यामोहयन्ति लोकान् एतन्मतं हि श्रुतिस्मृत्यादिषु क्वापि नोपलभ्यते इत्यादिकं तदत्यन्तमनभिज्ञतानिबन्धनमिति प्रतिभाति । तथा हि रामानुजीयमतमित्यनेन श्रीरामानुजयामुनमुनिनाथमुनिप्रभृतिभिः पूर्वाचार्य्यैस्तदुपजीव्य ग्रन्थकर्तृभिर्बोधायनद्रमिडगुहदेवादिभिः ऋषि-

भिप्राङ्गीकृतप्रतितत्त्वार्थमात्रं विवक्षितमुत तद्विशेषो वा? नाद्यः पक्षः तैर्नेश्वरजीवप्रकृतिमहदादिविशेषान्तानां चेतनाचेतनपदार्थानामङ्गीकृततया तेषां च धर्मविवादेऽपि स्वरूपे कस्यापि विवादाभावात्। अथ तद्विशेषोऽप्रामाणिकः। तथा हि विशिष्टाद्वैतं कुत्रापि न श्रूयते। तथा तप्तचक्रादिमुद्राधारणं मृदा श्वेतयोर्ध्वपुण्ड्रधारणं शिवादिदेवतान्तरार्चनाभाव इत्यादिकं कुत्रापि न श्रूयते इति चेन्न विशिष्टाद्वैतं कुत्रापि न श्रूयत इत्यनेन विशिष्टं न श्रूयत इत्युच्यतेऽद्वैतं वा न प्रथमः सर्वज्ञत्वसर्वात्मत्वापहतपाप्मत्वकारणत्वकार्य्यत्व-तदुपयोगिविशेषण-सर्वशरीरत्वादिविशेषणविशिष्टस्य सर्वत्र श्रूयमाणत्वात्। तादृशविशेषविशिष्टमेकमेवेति द्वितीयोऽपि पक्षो न सम्भवति, तप्तमुद्राधारणं न श्रूयत इति तु शास्त्रानवलोकनकृतम्। चतुर्षु वेदेषु तदुपबृंहणस्मृतीतिहासपुराणादिषु तत्प्रतिपादक-वाक्यानां बहूनां सुदर्शनमीमांसाचक्रोल्लासरूपचरित्ररक्षापरिकरविजयादिग्रन्थेषु अस्मदाद्यैः रामार्चनचन्द्रिका-हरिभक्तिविलासादिग्रन्थेषु शङ्कराचार्य्य-मध्वाचार्य्यसम्प्रदायानुयायिभिर्लिखितत्वात् तेषामर्थान्तरपरिकल्पनं कल्पादिकृतविनियोगनिबन्धनं तत्परत्ववर्णनं च न स्वारसिकाविरुद्ध-तदर्थप्रतिपादनस्य पञ्चरात्रादिकृतचक्रादिधारण-विनियोगनिबन्धन-तत्परत्वस्य च विरोधि। केषाञ्चिन्मन्त्राणां हि शकटाभिमन्त्रणादौ विनियुक्तानामपि देवपूजादावुपचारविशेषे विनियोगो दृश्यते। अत्र विशेषतो विचारस्तत्तद्ग्रन्थेषु द्रष्टव्यः श्वेतमृदोर्ध्वपुण्ड्रधारणे प्रमाणं लिखि-

तमेव देवतान्तरार्चनाद्यभावोऽस्मदवलम्बितोपास्याधिकारभूता-
नन्यदेवत्वभङ्गभयकृतः । तस्माद्दीक्षितो न ददातीत्यादिना हि
नित्यानुष्ठेयस्याधिकारिविशेषस्य पर्य्युदासकृतः । अतस्तप्तमुद्रा-
धारणाद्याचारौ विशिष्टाद्वैतसिद्धान्त इत्यादिकं सर्वमपि रामा-
नुजीयमतितत्त्वार्थजातम् । स्मृतीतिहासादिप्रतिपादितमिति
तदविरुद्धं चेति एतेषामुत्तरं सप्रमाणं देयमिति सर्वशेषं भूत-
मवशिष्टं वाक्यं तत्रोत्तरं दत्तमेव । यद्येतत्स्रष्टारः पण्डिताभि-
मानिनोऽस्मदीयवाक्यजातविचाराऽभिप्रायज्ञान-तदुत्तरपर्य्यालो-
चनलेखनक्षमास्तर्ह्येतद्वाक्यजातं सम्यग्विचार्य्य भावं निरूप्यैत-
दनुगुणमुत्तरं ददताम् । स्वयमसमर्थाश्चेत् पण्डितम्मन्यान् कांश्चि-
दाश्रितास्तैः समुचितमुत्तरं दापयन्तु । तदुपरि वयमपि समु-
चितमुत्तरं दास्यामः । यदि ते च ते चासमर्थास्तदा विरम-
न्त्विति कृतं वार्त्ता विसर्गैः इति ।

सव्य॰ यत्तु महाराजाधिराजराजराजराजराजेन्द्रजय-
नगराधीशकृतचतुःषष्ट्यवान्तरावलम्बिवाक्यकप्रधानीभूताष्टप्रश्न-
वाक्यानामुत्तराभासानि कृत्वानभिज्ञजनव्यामोहार्थं कारिनन्द-
ननयावलम्बिभिः शिष्टजनसिद्धान्तितैकजात्युचितत्वकस्वमतस्य
स्वस्वोचित-त्रैवर्णिक-श्रुतिस्मृतिप्रतिपादितधर्मप्रख्यापनैकफलकस्य
शास्त्रसिद्धत्वसम्पादनार्थं यत्त्वित्यारभ्य तदविरुद्धं चेत्यन्तक-
वाक्यकदम्बकं विशिष्टाद्वैतस्येष्टदूर्द्धपुण्ड्रधारणशिवादिदेवतान्त-
रार्चनाभावतप्तमुद्रादिधारणाद्यावश्यकत्वाभिप्रायकमुक्तं तदस-
ङ्गतम् । तथा हि रामानुजीयमतस्य व्यामोहकत्वं यच्छिष्टैः

सिद्धान्तितमन्यत्र यच्चैतत्समीचीनमेव “कापालं पाञ्चरात्रं च यामलं वा ममार्हतम्। एवंविधानि चान्यानि मोहनार्थानि तानि तु॥ ये कुशास्त्राभियोगेन मोहयन्तीह मानवान्। मया सृष्टानि शास्त्राणि मोहार्थेषां भवान्तरे॥” इति कूर्मपुराणीयैकादशाध्यायस्थ-वचनावगतव्यामोहकत्वपाञ्चरात्रावगमावलम्बित्वात् रामानुजीयमतस्य यदप्यत्रोक्तं तदत्यन्तानभिज्ञतापरमिति इदमेवात्यन्ताभिज्ञतापरं त्रैवर्णिनाऽनुष्ठेयत्वेन श्रुत्या स्मृत्या वा रामानुजीयमतस्य क्वाप्यप्रतिपादनात्। न च नातप्ततनुरित्यादिश्रुत्या,—

“अग्निनैव तु संतप्तं चक्रमादाय वैष्णवः।

धारयेत् सर्ववर्णानां सार्ष्टिसालोकसिद्धये॥”

इति ब्रह्माण्डपुराणीयवचनेन च प्रामाण्यप्रतिपादनात्, तद्घटितत्वात् रामानुजीयमतस्य श्रुतिस्मृतिसिद्धत्वमेवेति वाच्यम्, उपक्रमोपसंहारबलेन श्रुतेरन्यार्थकताया अन्यत्र बहुशो निरूपितत्वात्; अन्यथैतत्-श्रुतिबलाल्लिङ्गाङ्कनादीनामपि श्रुतिसिद्धत्वसिद्धा भवत्तु तेषामप्यापत्तेः ब्रह्माण्डपुराणीयवचनादीनाम्,—

“शंखचक्राद्यङ्कनं च गीतनृत्यादिकं तथा।

एकजातेरयं धर्मो न जातु स्याद् द्विजन्मनः॥’

इति स्मृत्यनुरोधेन पतितब्राह्मणविषयकतायाः प्रागेव सिद्धान्तितत्वात्। यदप्युक्तं विशिष्टं न श्रूयतेऽद्वैतं वा न प्रथमः सर्व्वादिविशेषणविशिष्टस्य सर्वत्र श्रूयमाणत्वात्, तादृशविशेषणविशिष्टमेकमेवेति द्वितीयोऽपि पक्षो न सम्भवतीति तदप्यस-

(४८)

क्तम्। विशिष्टस्य प्रत्येकस्वरूपत्वे त्वदुक्तसिद्धान्तस्य प्रतिपादनीयत्वेऽपि प्रत्येकस्वरूपत्वकल्पस्य दण्डिकर्मकानयनाभिप्रायेण दण्डमानयेत्यादिप्रयोगापत्तिदोषेण प्रागेव दूषितत्वात्। यदप्युक्तं तप्तमुद्राधारणं न श्रूयत इति तु शास्त्रानवलोकनकृतमिति तदप्यसङ्गतम्। त्रैवर्णिकाऽनुष्ठेयत्वेन तप्तमुद्रादीनां धारणस्य कस्यामपि शाखायामनुपलम्भात् श्वेतमृदूर्द्ध्वपुण्ड्रधारणमपि द्विजेतरविषयम् विन्यासविशेषविशिष्टतयेति प्रागेवास्माभिः सिद्धान्तितं यदप्युक्तं सर्वमपि प्रतितन्त्रार्थजातं रामानुजीयं श्रुतिस्मृतीतिहासादिप्रतिपादितमिति तदपि निरुक्तक्रमेण श्रुतिस्मृतीतिहासतात्पर्य्यानवगतिमूलकम्। त्रैवर्णिकेतरविषयं चेति प्रतिपादितम्। प्रागेव सम्यक् न युक्तिभिरेतेषां वास्तवश्रुतिस्मृत्यर्थानुकूलपरम्परागतत्रैवर्णिकोचितधर्मवृषभध्वंसनप्रवृत्तरामानुजीयादिनयावलम्बिद्विपवृन्दकुम्भोत्पाटनक्षम-श्रुतिस्मृति-नखपुञ्जराजराजेन्द्रजयनगराधीश-रामपञ्चास्यकृत-प्रश्नोत्तरखण्डनानामुपक्रमोपसंहारबलेन श्रुतिस्मृतितात्पर्य्यमवगत्य स्वयमथ वा निरुक्तक्रमावगतवेदान्ततात्पर्य्यक-वाराणसीस्थ-निर्लोभविद्वद्वरादवगत्य श्रौतस्मार्तमार्गाश्रयणं कार्य्यमन्यथा वर्णाश्रमरहितेषु स्वमन्तर्भाव्य राजाधिराजेषु निवेद्य च स्वान्तर्भावं स्थेयमन्यथा जयनगराद् वहिर्भवन्तो निष्कासिता भविष्यन्तीति अलं कतिपयपल्लवैरिति तत्खण्डनमिति।

व्या० अत्र यत्त्वित्यादिनोक्तमित्यन्तेनास्मदुक्तमस्मदुक्तानामारोपितराजराजजयनगरप्रजापतिकृतत्वकप्रश्नोत्तराणामाभास-

त्वोक्तिपूर्वकं तादृशराजराजराजेन्द्रव्यवस्थापितमतविशेषावलम्बिशिष्टजनगोष्ठनर्हैरनूद्य तदसङ्गतमिति प्रतिज्ञायोक्तं तदसङ्गतम्। अस्मदुक्तानामुत्तराणामाभासत्वस्य स्ववाक्यदृष्टान्तेन पण्डितोक्तत्वहेतुना तैरनुमितत्वेऽपि हेतोर्व्यभिचारितया दृष्टान्तस्य साधनवैकल्याच्च न पण्डिता अनुमन्यन्ते। किं चानभिज्ञस्यानवगतार्थं पृच्छति, तदभिज्ञः तद्व्यामोहनिवृत्तये प्रतिवदति, यद्युत्तरेण तस्य व्यामोहः स्यात्, तदा व्युत्पत्तिसामग्र्यभाव एव तत्कारणमिति वक्ता किं कुर्य्यात्? किं च वेदशास्त्राविरोधिनयस्य कारिनन्दनीयत्वे तदवलम्बनं न दोषावहम्। न हि वयमुदरपोषणैकप्रयोजनकात्पज्ञकृतमार्गविशेषनिष्ठाः श्रौतस्मार्तधर्माणां निन्दां कुर्म इति नोपालम्भ्याः। परन्तु असाधुः साधुं, नास्तिक आस्तिकमसती सतीं च स्वाचारविरुद्धाचारदर्शनेनाशिष्टं मन्यते, स्वसदृशं शिष्टं मन्यतेऽतो भवादृशशिष्टजनसिद्धान्तितमेकजात्युचितत्वं नास्मद्धर्माणां सकलश्रुतिस्मृति-तदुपबृंहणतात्पर्य्याभिज्ञाऽभिमन्येयुः मद्यपानाद्यधर्मप्रच्यावनफलकस्य श्रुत्यादिप्रतिपादितधर्मप्रच्यावनैकफलकत्वाभिधानमप्यधमं धर्ममिति या मन्यते, तमसावृता सर्वार्थान् विपरीतामित्याद्युक्तामसबुद्धिकृतम्। तथा हीत्यादिना रामानुजीयमतस्य व्यामोहकत्वमित्यादिकं यदुक्तं तत्रोच्यते, भवदभिमतशिष्टजनसिद्धान्तो न प्रामाणिकहृदयङ्गमः। निरुक्तपुराणवचनमितिहासश्रेष्ठ-श्रीमहाभारतप्रशंसितसात्विकैकान्तिधर्माणां पाञ्चरात्रप्रतिपादितानां व्यामोहकत्वप्रतिपादनायालमिति प्रा-

गावेदितम् । मया सृष्टानीति तद्वचनेनैव पाञ्चरात्रस्य व्याव-र्त्तितत्वात् ।

"सांख्यं योगं पाञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजर्षे ! विद्धि नानामतानि वै ॥
सांख्यस्य कर्त्ता कपिलः परमर्षिः स उच्यते ।
हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः ॥
उमापतिः पशुपतिः श्रीकण्ठो ब्रह्मणः सुतः ।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं तथा ॥
पाञ्चरात्रस्य कृत्स्नस्य वेत्ता तु भगवान् स्वयम् ।
सर्वेषु च नरश्रेष्ठ ! ज्ञानेष्वेतेषु दृश्यते ॥
यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः ।"

इत्यादिशान्तिपर्व-मोक्षधर्मीय-द्विपञ्चाशदधिकत्रिशताध्यायीय-वचनेन पाञ्चरात्रस्य पाशुपतकर्त्तृविलक्षणकर्त्तृकत्वावगमेन तदेक-कर्त्तृकत्वासम्भवात् । अत्र तदेककर्त्तृकत्वाभिधानं च सात्त्विक-धर्मवैमुख्यसम्पादनार्थं तामसपुराणानां तदर्थत्वं पद्मपुराण-वचनप्रमाणेन प्रागावेदितमेव यदप्युक्तमित्यादिना यदुक्तं तद-प्यसङ्गतम् । त्रैवर्णिकैरनुष्ठेयं रामानुजीयं मतमिति श्रुत्यादिना-ऽप्रतिपादनेऽपि वैदिकधर्माणां तदनुष्ठेयत्वाव्याहतेः ज्योतिष्टो-मादिश्रौतकर्मणां त्रैवर्णिकानुष्ठेयत्वं न कण्ठतः कुत्रचिदुक्तं राजसूयस्य राजानुष्ठेयत्ववत्, किन्तु अर्थित्वसामर्थ्यवतां त्रैवर्णि-कानां तदनुष्ठेयत्वं स्वत एव ज्ञायते। न चेत्यादिशङ्कासमा-धानं यदुक्तमुपक्रमेत्यादिना तदशुद्धम्। अन्यार्थकत्व उपक्रमा-

दीनामनुक्तेः। अन्यत्र बहुशो निरूपितमिति चेत्? तत्प्रति निरूपणमपि बहुशः कृतमिति न तेन भवदभिमतसिद्धिः। किं च नातप्ततनूरित्याद्यश्रूयमाणश्रुत्याकारलेखेन स्वस्य वेदनिर्माहत्वौपयिकं पाण्डित्यं प्रकटीकृतम् अतप्ततनुरित्यादिश्रुतेः। "पवित्रमित्यग्निरग्निर्वै सहस्रार" इत्यादिश्रुत्या "चक्रं बिभर्त्ति वपुषाभितप्तं बलं देवानाम्।" इत्यादिश्रुत्या चोक्तार्थे पर्य्यवसानात् न लिङ्गाङ्कनादिधारणं प्रसज्यते। कुत्रचित् शंखचक्राद्यङ्कनं चेत्यादिवचनार्थः सोपपत्तिकः प्रागुक्त एव तं विचार्य्यापार्थकरणाद्व्याहृक्तिरूपिता पण्डितानाम्। किं च नात्र पतितब्राह्मणविषयकत्वं सिद्धान्तितं न वा तत्सम्भवः। यत्तु यदप्युक्तमित्यादिनास्मदुक्तमनूद्य तदप्यसङ्गतमित्यादिनोक्तं तदपि तुच्छम्। विशिष्टस्य प्रत्येकस्वरूपत्वे इत्यादिदूषणस्य प्रागेव निरस्तत्वात्। यदप्युक्तमित्यादिसिद्धान्तितमित्यन्तमनुपादेयम्। तत्र शास्त्रानवलोकनेत्यत्र शास्त्रानवलोकनेति लेखकभ्रमकृतम्। किं च त्रैवर्णिकाऽनुष्ठेयत्वेन तप्तमुद्रादीनां धारणस्याऽनुक्तावपि मुमुक्षुभिरनुष्ठेयत्वेन शास्त्रासूक्ततया त्रैवर्णिकानुष्ठेयत्वमुक्तमेव वैदिकानां तैरेवाऽनुष्ठेयत्वात् श्वेतमृदूर्द्ध्वपुण्ड्रधारणमपि त्रैवर्णिकेषु निषेधाभावेन तदतिरिक्तविषयकमिति न वक्तुमुचितम्। विन्यासविशेषोऽपि प्रमाणेनोपपादित एव यदप्युक्तं सर्वमपि प्रतितन्त्रार्थजातमित्यादि प्रतिपादितमित्यन्तं तन्न सत्, विशेषस्य सर्वस्य श्रुतिस्मृत्यादिमूलकत्वस्याभिहिततया, निर्विशेषं न सामान्यमिति न्यायेन सामान्यस्यापि प्रामाणिकत्वसंप्रतिपत्त्या श्रुति-

स्मृत्यादीनां तत्रैव तात्पर्य्यावधारणेन तदनवगतिमूलकत्वासम्भवात् निषेधाभावात् तामसपुराणादिकृतस्य निषेधस्य भारतादिनिर्णीतेऽर्थेऽकिञ्चित्करत्वात् त्रैवर्णिकेतरविषयकत्वकल्पनासम्भवाच्च वास्तवेत्यादिरूपकमपि नास्माकमवद्यावहम्। यतो द्विपानामन्नपत्रादिना जीवतां न वृषभध्वंसनप्रवृत्तिरुचिता, मांसाहाराणां सिंहानामेव तदौचित्यात् पञ्चाननस्येव पशुविध्वंसनप्रवृत्तिमेतिह्यका वदन्ति। काञ्चीपुर्य्यां विद्याभ्यासार्थं वाराणसीमागतैरस्माभिस्तत्रत्य-निर्लोभपण्डितेभ्य एवोपक्रमोपसंहारादिबलेन श्रुतिस्मृतितात्पर्य्यमवगतम्। भवत्कृतचुरदन्तनखादिकरणकोत्तरखण्डनानां तात्पर्य्यमुपक्रमादिना नावगन्तुं शक्यम्। तादृशश्रुतितात्पर्य्यावगमेन श्रौतस्मार्तमार्गाश्रयणं कृतं, क्रियते, करिष्यते च। अतएव वर्णाश्रमादिरहितेषु नित्यमुक्तेषु अस्माकमन्तर्भावो भविष्यत्येव। प्रणामनम्रनिखिल-राजमणिमुकुटरत्नप्रभानीराजितचरणभृत्यवर्गेषु राजराजेषु कृष्णेषु स्वस्य नित्यमुक्तान्तर्भावनिवेदनेन किं प्रयोजनम्? ते हि प्रवृत्तिः यत्र चक्षुषः सर्वं जानन्ति जयनगरान्निष्कासिताः कति कति निमित्तापाये तदेव नगरमप्रविशन् इत्यलं व्यर्थभाषणेन। अथ काशीस्थपण्डितराजलोककृतव्यवस्थापत्रं निखिलवैष्णवमतदूषणाय प्रवृत्तेन वैष्णवमतेषु रामानुजीयं मतं बहुतरपण्डिताग्रेसरपरिरचितं प्रबलतरं मत्वानेन जयपुरमहाराजसविधवर्तिना लक्ष्मणनाम्ना केनचित्प्रश्नप्रतिप्रश्नलेखः कृतः। स लेखो राजसम्बन्धिना परमवैष्णवक्षेत्रे वृन्दावने प्रेषित इति

तत्र सर्वैर्वैष्णवैर्द्दृष्टोऽथ तत्समाधानाय श्रीरङ्गाचार्य्यैर्लिखित्वाथ जयपुराधीशसविधे प्रेषितोऽथ तदर्थबोधनार्थं स्वनगरस्थपण्डितानाकार्य्य पत्रार्थो यथावद् बोधनीय इत्याज्ञप्तम्। लेखं दृष्ट्वा पत्रार्थबोधनायैते हि न शेकुर्य्यदा तदा दिल्लीनागरिको हि वाचाल इति तन्नगरस्थितं हरिचन्द्रनामानमानायितवान्। पत्रार्थं यथावद् बोधनाय सोऽपि नाशकदिति बोधितवान् श्रीवैष्णवान्यवैष्णवमतखण्डनपत्रं कृत्वा तत्र काशीस्थपण्डितैः सम्मतिं कारयित्वा मनीषितसिद्धिरिति राजाज्ञां लब्ध्वा काशीं प्राप्तस्त्विषद्धस्ताशावशीकृतमानसजनसम्मतिं कारयित्वा कृत्वा च स्वयं काव्यवशागतकलकत्तास्थराजसमीपं गतः सम्मतिदर्शनाय तत्र राज्ञा काश्यागमे यद्भविष्यतीति विसर्जितोऽथ राजा। यदा हि काश्यामागतस्तदा च वैष्णवैः खण्डनमण्डनार्थं चाभि-
ोगप्रार्थनपत्रं राज्ञे दत्तम्। विवादाय वयं प्रवृत्ताः वादिनो
ाजित्यैव सिद्धान्तसम्मतिपत्रं योग्यमिति प्रभृति लिखि-
राजा च स नाहं विवादायात्रागत इति कथयित्वा
ातः। जयपु[illegible] पत्रलेखप्रत्युत्तरमप्राप्य काश्यां [illegible]य-
[illegible]धीन-हरिचन्द्रकृतकोलाहलं श्रुत्वा [illegible]

काशीस्

तत्र सर्वैर्वैष्णवैर्दृष्टोऽथ तत्समाधानाय श्रीरङ्गाचार्य्यैर्लिखि-
त्वाथ जयपुराधीशसविधे प्रेषितोऽथ तदर्थबोधनार्थे स्वनगरस्थ-
पण्डितानाकार्य्य पत्रार्थो यथावद् बोधनीय इत्याज्ञप्तम्। लेखं
दृष्ट्वा पत्रार्थबोधनार्थेते हि न शेकुर्य्यदा तदा दिल्लीनागरिको
हि वाचाल इति तन्नगरस्थितं हरिचन्द्रनामानमानायितवान्।
पत्रार्थं यथावद् बोधनार्थे सोऽपि नाशक्दिति बोधितवान्
श्रीवैष्णवान्यवैष्णवमतखण्डनपत्रं कृत्वा तत्र काशीस्थपण्डितैः
सम्मतिं कारयित्वा मनोषितसिद्धिरिति राजाज्ञां लब्ध्वा काशीं
प्राप्तस्तिसहस्राशावशीकृतमानसजनसम्मतिं कारयित्वा कृत्वा च
स्वयं कार्य्यवशागतकलकत्तास्थराजसमीपं गतः सम्मतिदर्शनाय
तत्र राज्ञा काश्यागमे यद्भविष्यतीति विसर्जितोऽथ राजा।
यदा हि काश्यामागतस्तदा च वैष्णवैः खण्डनमण्डनार्थे चाभि-
ोगप्रार्थनपत्रं राज्ञे दत्तम्। विवादाय वयं प्रवृत्ताः वादिनो
ऽजित्यैव सिद्धान्तसम्मतिपत्रं योग्यमिति प्रभृति लिखि-
ाजा च स नाहं विवादायात्रागत इति कथयित्वा
ातः। जयपु पत्रलेखप्रत्युत्तरमप्राप्य काश्यां य-
धीन-हरिचन्द्रकृतकोलाहलं श्रुत्वा

काशीर

दिल्लीनगरनिवासिना राजाज्ञां पुरस्कृत्य ग्रामादिदानवार्तया प्रलोभ्यमाना बहुशः राज्ञा च स्वावासस्थाने मानमन्दिर आहूय हरिश्चन्द्रदत्तपत्रे सम्मतिलेखं प्रति प्रार्थिताः सम्मतिं कथं न चक्रुः। यद्येकेनैवेदं कृतं, तदा सर्वे पण्डितास्तत्र सम्मतिं कथं चक्रुः? यदि ब्राह्मणत्वं भृतकाध्यापनेन लुप्येत, तदा सर्वेषां तादृशानां तल्लुप्येतैव। शुद्धब्राह्मणनिन्दया च "तस्माद् ब्राह्मणाय नावगुरेत योऽवगुरेत तं शतेन यातयात्" इति श्रुत्युक्तशतयातनानुभवो निन्दकानामेव भवेत्। श्रुतिस्मृति-तात्पर्य्यं सम्यक् ज्ञात्वैव श्रुतिस्मृतितात्पर्य्यानुगुणेऽस्मत्पत्रे सम्मतिं चक्रुः। स्वाभीष्टविसंवादिषु प्रतीपाभीष्टसंवादिषु किमिति क्रोधं न कुर्य्युः? 'क्रोधैकशरणाः स्वकार्य्यनिर्णयार्थम्' इत्यादिकं स्वस्व-दृष्टान्तेन लिखितमिति। न हि वचनप्राबल्य-दौर्बल्यपरीक्षका-स्तद्वचनमिद्धं मध्यस्थाः सर्वेऽङ्गीकुर्य्युः, स्वाभ्यस्तशास्त्रबलेन समीचीनमिदमसमीचीनमित्येव वदेयुः। न हि तेषां कश्चन दोष आरोपणीयोऽभियुक्तैनेति सर्वं चतुरस्रम् इति।

इति श्रीरङ्गाचार्य्यस्वामिविरचितं व्यामोहविद्रावणं समाप्तम्।